This Mahākāvyaṃ with the central theme of estrangement of lovers and their reconciliation and reunion, has only three characters, viz. Kṛṣṇa, Rādhā and her companion. The names of Sudāma and Vicakṣaṇā are also mentioned. [62] Leaving apart the narrative charm that it possesses, the work has striking descriptions of natural beauty and expressess varied emotions arising out of situations similar to those in the famous Gītagovindaṃ. The poet has charmingly depicted the riverside forest, the seasons like spring, rain, autumn and the youthful sentiments of Rādhā and Kṛṣṇa as well as their amorous sports.

62. Abhinavagitagovindam—Canto-V, verse-3 & Canto-1. verse-15.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Following the foot-prints of Jaya Deva he pays homage to the ten incarnations of God in the first Prabandha where-in ŚriJagannātha is described as Nilādri-pati, Achyuta and Kṛṣṇa. This list of incarnations omits the Buddha and adds Kṛṣṇa instead, and as such, Matsya, Kachhapa, Varāha, Nṛsiṃha, Vāmana, Paraśurāma, Rāma, Balarāma, Kṛṣṇa and Kalki are described as the incarnations of Nilagiripati.[63] Jaya Deva, in his Gitagovindaṃ, excludes Kṛṣṇa from the list of incarnations. But the verses that follow the descriptions of the ten incarnations indicate that for him Jagadiśa Hari is no other than Kṛṣṇa himself. [64]

The celebration of Godly love in human terms is accepted as spiritual by the poet saints of India. Our poet also describes the beauty as well as the nature of Lord Kṛṣṇa, who, in his different incarnations, acted as the saviour of the universe, along with his human longing for Rādhā, in the following lines.

गोपीजनालिङ्गितमध्यभागं
वेणुं धमन्तं भृशलोलनेत्रम्।
कलेवरे प्रस्फुटरोमवृन्दं
नमामि कृष्णं जगदेककन्दम्॥[65]

× × ×

तामेवेक्षणमीक्षते श्रवणयोस्तद्वाचि वृत्तिः परं
तद्बिम्बाधरमाधुरीपरिचयं धत्ते रसज्ञा मम।

63 Abhinavagitagovindam—P. I-II
64 Gitagovindam—Canto-I, verse-1?
65. Abhinavagitagovindam—Canto-I-verse 6.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्वक्त्राम्बुजसौरभं कलयते नासापरिष्वङ्गिणो
त्वक् तस्या हृदयं च तत्र यदि किं कामोऽपि वाभायते ॥[66]

After describing the conditions of pining Rādhā in the first canto, the author again depicts her abhilāṣa or the wish which is usually refered to by the rhetorician as the first of the ten Kāmadaśās. [67] Rādhā expresses her pangs of separation in the following words—

कालो वसन्तो नवयौवनाहं लज्जाविशेषो मदनस्य पीड़ा ।
जने दुरापे महती स्पृहा मे न कोऽप्युपायः सखि जीवनाय ॥[68]

Rādhā's companion narrates the love-stricken condition of Rādhā before Kṛṣṇa—

श्वासान्मुञ्चति मन्दचन्दनमरुत्सङ्गे कुरङ्गेक्षणा
पश्यन्ती मकरन्दविन्दुभवनीं वाष्पाम्बुना सिञ्चति ।
किञ्चोदञ्चितपञ्चमस्वरभरं श्रुत्वा पिकानां रुतं
कर्णौ सा पिदधाति नैव विरहे कुत्रापि धत्ते रतिम् ॥[69]

But Vicakṣaṇā, a close companion, consoles Rādhā that one should keep up patience, save life first, and then try to get the wish fulfilled as without the seed even the well-furrowed soil will not bear any fruit—

---

66. Abhinavagitagovindam—Canto-II verse-4.

67. अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापश्च ।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशा ॥
साहित्यदर्पण ॥ ३—१६०॥

68. Abhinavagitagovindam—Canto-I verse-14.

69. -do- Canto-II verse-8.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न काचिच्चिन्ता ते भवतु सखि धैर्य्यव्ययकरी
पुर. प्राणनाथं दयितमधिगन्तुं समुचितम्।
घनाम्भोभिः सिक्ता क्वचिदपि हलाग्रेण दलिता
विना बीजैर्भूमिः फलमभिमतं नो जनयति ॥[70]

These lines give a truth more lively than the sayings of Mahākāvi Kālidasa. [71]

The Abhisārikā [72] Rādhā acknowledging the power of love sends her friend to seek her lover Kṛṣṇa, But the companion returns and describes the condition of Kṛṣṇa pining for her. [73] Though they meet afterwards Rādhā's sentiments are hurt by the words of Kṛṣṇa and she picks up a quarrel with him and leaves the place. Rādhā like a Kalahāntarita,[74] angrily looks at her darling and takes to the forest path. The poet describes Vipralabdhā[75] as very disrespectful to Kṛṣṇa who does not come after having made an assignation. But the companion of Rādhā consoles and advises her to remain prepared in her house awaiting the arrival of lover Kṛṣṇa. The night passes by leaving the Vasakasajjā[76] Rādhā in despair. Kṛṣṇa does not come. She

---

70. Abhinavagitagovindam—Canto-I verse-16.
71 Kumarsambhava—Canto V. verse-33.
72. अभिसारयते कान्तं या यन्नथवशम्वदा।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ॥ साः दः ३—७६ ॥
73. Abhinavagitagovindam—Canto-III verse-7
74. चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहोन्तरिता तु सा ॥ साः दः ३—८२ ॥
75. प्रियः कृत्वापि सङ्केतं यस्या नायाति सन्निधेम्।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥ साः दः ३ ८३ ॥
76. कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि।
सा तु वासकसज्जा स्याद् विदितप्रियसङ्गमा ॥ साः दः ३—८५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

asks her companion how many nights can she wait for the treacherous Kṛṣṇa who disappoints her on many occasions. Virahotkanthitā[76] she weeps and says.

यन्नागतः स समयं बहुधा विधाय
किं तत्र सम्प्रति मनः सखि खिद्यते मे।
स्यादेव कैतवविदां बहुवल्लभानां
नारीजनेऽभिमते प्रणयः प्रमादः ॥[78]

Rain continues. Kṛṣṇa is late to come. Rādhā like a Proṣitabhartṛkā[79] feels her life insecure without Kṛṣṇa. In this way the author describes the different states of mind of amorous Rādhā and how Rādhā in herself illustrates the characteristics of all the different types of Nāyikās grouped together under the head of Sādhāraṇīnāyikā as defined in Sanskrit poetics.

The poet beautifully depicts the three main seasons like spring, summer and rain in appropriate places with lively pictures of nature.[80] Early in the kavya the amorous anguish of Rādhā separated from her beloved Kṛṣṇa is presented in the background of the spring season which is exquisitely described by the poet who also indicates that it is to be sung according to the Vasantarāga. Thus the

---

77. आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा ॥ सा दः ३—८३ ॥

78. Abhinavagitagovindam—Canto-III verse-II

79. नानाकार्य्यवशाद्यस्या दूरदेशं गतः पतिः।
सा मनोभवदुःखार्त्ता भवेत्प्रोषितभर्त्तृका ॥ सा; दः ३—८४ ॥

80. Abhinavagitagovindam—Prapandha-20, 57 ad 58.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

theme and the tune are in harmony with each other.[81] The spring heightens the emotion of love. The malaya wind blows disturbing the minds of the youths and the companion of Rādhā addresses her in this background.[82] The kavya in fact abounds in descriptions of the spring season which occur in different places[83] as the background of the love-lorn condition of either Kṛṣṇa or Rādhā. The summer is described realistically in the following verse—

स्फुटन्ति ग्रावाणस्तपनकिरणैर्न स्फुटति वा
कथं चित्तं तस्य ज्वलति विरहाग्नौ तु मृदुलम् ।
वराहार्णा पङ्के प्रविशति कुलं घर्मविधुरं
न पङ्कं काश्मीरं स्पृशति च हरिः संज्वरभयात् ॥[84]

As Kalidasa said 'मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेत':[85] so our poet, too, describes Vipralambhasṛṅgāra in the background of the rainy season chiefly in ninth canto. Rādhā is described through the words of the lover kṛṣṇa as a pond caused by the rain—

कालुष्यं पयसां चिराय हृदये धाराधरत्वं दृशो-
रम्भोदध्वनिसङ्गता परुषता वाचि भ्रुवोः सुन्दरि ।
विद्युद्वल्लरीताण्डवं च तनुते लीलायितं प्रावृषो
नादत्ते शरदः प्रसादमधुना किं ते गभीराशयः ॥[86]

---

81. Abhinavagitagovindam—Prabandha-3.
82. Abhinavagitagovindam—Canto-I verse-10
83. Ibid—Prabandhas-11, 13, 16, 21 and others.
84. Abhinavagitagovindam—Canto-VIII verse-15.
85. Meghadutam—verse-3.
86. Abhinavagitagovindam—Canto-VII verse-12.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Thus the tale of Rādhā and Kṛṣṇa in their amorous longing for each other is presented in the background of the spring, the summer and the rainy season, each intensifying their desire for union with each other which is fulfilled at the end.

The predominantly lyrical poetry of this mahākāvya is occasionally fused with subtle dramatic elements in verses which represent the dialogues between the hero and heroine marked by bantering wit in the following manner—

कान्ते कस्य ममैव नाहमितरा सा जीवितेशोऽस्मि ते
न त्वं दण्डधरः परं मम मयेदालिङ्गनं त्वत्प्रियम्।

नेदं प्राणविपर्य्ययेऽमिलषितं मानं त्यज क्रोडितुं
यामो नैतदुपैमि कालनगरीं तत्किं विधास्ये वद ॥[86]

Besides there are a number of cryptic and epigrammatic lines revealing the author's wisdom as well as close observation of his life and nature in Abhinavagitagovindaṃ, some of which are quoted below—

विना बीजैर्भूमि फलममिततं नो जनयति ॥ १—१६ ॥

× × ×

परिहरति चकोरः किं शरच्चन्द्रकान्तिम् ॥ १—२१ ॥

× × ×

नारोजनेऽप्यभिजने प्रणयः प्रमादः ॥ ६—११ ॥

87. Abhinavagitagovindam—Canto-X verse-16.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

× × ×

यत्कोपं प्रणये विराजति परं वैरं भवेदन्यथा ॥ ७—४ ॥

× × ×

प्रायो मिलन्ति विपदः सहसा जनानाम् ॥ ८—३ ॥

× × ×

हर्म्योदरे रतिकथाः कलयन्ति धन्याः ॥ ९—१२ ॥

(h) ***Popularity of Abhinavagitagovindam*** —

The scholars all over the country have discussed widely the association of Abhinavagītagovindaṃ with Gītagovindaṃ and the work has attained fame among the lovers of Sanskrit literature. The famous Vaiṣṇava poet Rūpa Gosvāmī (1490-1563 A.D.) was influenced by the lines of Abhinavagītagovindaṃ and included six of its verses in his 'Padyāvalī'[88] an anthological work on the Kriṣṇāite faith.

Padyāvali	Abhinavagītagoviṃnda	
Verse No.	Canto	Verse
48	1	7
156	1	1
161	1	12
220	5	14
221	6	10
293	1	6

Jagannatha Miśra, (1725-1775 A.D.) a famous rhetorician of Orissa, has also quoted one verse from Abhinavagītagovindaṃ (Canto III, verse-6) in his Rasakalpadruma.[89]

88. Padyavali—Edited by S. K. De, 1934.
89. Rasakalpadruma—Edited by B. Acharya, P. 33.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Editorial Note –

The colophon which contains historical truth and important from the view point of critical study has been appended in this publication. The rāgas that are used in this work along with their characteristics have also been given in the appendix for reference. The names of the cantos and the number of the Prabandhas are arranged for convenience of the readers.

It is regretted that inspite of sincere efforts certain errors in printing have crept in. A correction slip is appended at the end.

Now I on behalf of the Department record my thanks to the authorities of the Utkal University for permitting me to utilise their manuscript available in their liabrary. I am also grateful to the Chief Editor, Prof. Sarbeswar Das for his kind guidance. I am also thankful to Pandita Nīlamani Mishra, curator, Sanskrit studies and Śri Dinanatha Pathi, curator, Art and craft of the Orissa State Museum and Pandita Srinibasa Ratha of the Utkal University, Bhubaneswar for their help and co-operation. My thanks are also due to Śri Suresh Chandra Jena, M.A., L.L.B, Asst. Editor and Srimati Chhavilata Devi. B.A. (Hons) who have sincerely prepared the press copy and helped me in this work.

Bhubaneswar.
Akṣaya Tṛtīyā
21. 4. 77.

Bhagaban Panda
Editor

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिनवगीतगोविन्दमहाकाव्यम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयसूची

सर्गः	विषयः	पत्राङ्काः
प्रथमः	विधुरराधः	१
द्वितीयः	सोत्कण्ठवैकुण्ठः	१२
तृतीयः	मुदितराधः	२०
चतुर्थः	विमूढ़राधः	२८
पञ्चमः	विदग्धमाधवः	३७
षष्ठः	संक्षुब्धराधः	४५
सप्तमः	विलक्षपुण्डरीकाक्षः	५४
अष्टमः	अकुण्ठवैकुण्ठः	६४
नवमः	अनुकूलराधः	७५
दशमः	सानन्दमुकुन्दः	८५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिनवगीतगोविन्दमहाकाव्यम्

श्रीगणेशाय नमः

श्रीराधाकृष्णाभ्यां नमः

प्रथमः सर्गः

विधुरराधः

कालिन्दीजलकेलिलोलतरुणीरावीत[1] चीनाम्बरा
निर्गत्याङ्गजलानिसारितवतीरालोक्य सर्वाः दिशः।
तीरोपान्तमिलन्निकुञ्जभवने गूढं चिरात्पश्यतः
शौरेः सम्भ्रमयन्निमा विजयते साकूतवेणुध्वनिः ॥ १ ॥

यस्याः कृपामृतनिषेकमृते न वर्ण[2]—
बीजानि चित्तभुवि सन्त्यपि निर्मलायाम्।
नूनं भवन्ति बहुपल्लवन्ति तस्याः
पादौ नमामि वचसामधिदेवतायाः ॥ २ ॥

शृणुत सुकृतमेतां वल्लवी-वल्लभस्य
प्रचुररसनिबद्धां नो खला मामकोनाम्।
अपि विनमितवक्त्रो गूढमुत्कण्टकोऽयं
सपदि हि विपपुच्छो वृश्चिको हन्ति गाढम् ॥ ३ ॥

निन्दन्तु नितरां खलाः परकृतिं ये प्राक्तनानां स्तुतिं
कुर्वन्तो मुदमुद्वहन्ति न तथा तेषां पुनः सन्निधौ।
निन्दामात्रपरायणाः[3] प्र तेपदं ये तान्विहायाधुना
संमोदं[4] दधतां सतां परकृतौ तृप्त्यै विधास्ये कृतिम् ॥ ४ ॥

---

1. क. ख तरुणीरावीत।
2. क. मृतेनवन्ति।
3. क. परायणाम्।
4. क. सम्मोहम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राधा-मुरारि-रमणीय रहस्यलीला—
सन्दोह-सुन्दरममन्द-गुणाभिरामम् ।
साहित्य-सारसमुदाय-बुधः प्रबन्ध—
मेतं[1] तनोति पुरुषोत्तम भूमिभर्त्ता ॥ ५ ॥

प्रथमः प्रबन्धः

(मालवगौड़ारागेण गीयते)

वारिपूरित-गगनकन्दर-जलधिमग्न-महासुरम् ।
शङ्खनामकमाशु जित्वा[2] कलितवेदमनातुरम् ॥
नमत मीन-शरीरमद्भुतमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारण नीलगिरिपतिमच्युतम् ॥
॥ ध्रुवपदमिदम्[3] ॥ १ ॥

विपुलगिरिवर-नगरकानन-जलधि-संचयसंचितम् ।
धरणिमण्डलमहह दधतं चरमकायनिवेशितम् ॥
नमतकूर्मशरीरमद्भुतमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारणनीलगिरिपतिमच्युतम् ॥ २ ॥

राहुकवलन-शिष्टशशधरकोटिलीनशशिद्युतिम्[4] ।
जलधिमग्नां दधतमवनीं दशनशेखर-सङ्गतिम् ॥
नमतकोलशरीरमद्भुतमखिलमुनिजन-वन्दितम्
जनन-पालन-नाशकारणनीलगिरिपतिमच्युतम् ॥ ३ ॥

रुचिर-किंशुकमुकुलकोटि-विलीनमधुकरमञ्जुलम् ।
दारयन्तमुदग्रनखरालीढ़दितिसुतमतिबलम्[5] ॥
नमत-नरहरिरूपमद्भुतमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारण नीलगिरिपतिमच्युतम् ॥ ४ ॥

---

1. क. प्रबन्धः मेतम् ।
2. ग. भित्वा ।
3. ख. ध्रुवपदमि त्युल्लेखो नास्ति ।
4. ख. ग. शशद्युतिम् ।
5. क. ख. दन्तसुतमतिबलम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादनखरस्पर्शनतुटदण्डजात-सुरापगम् ।
मृदुल-चरण-स्पर्शन-क्षणदमितदितिजं सर्वगम् ॥
नमत-वामनरूपमद्भुतमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारणनीलगिरिपतिमच्युतम् ॥ ५ ॥

धरणिपतिक्षुत्रकन्धरोत्थित-रुधिरधारामिप्लुतम् ।
धरणिमण्डलमनिशसन्ध्या कालमयमिव संहृतम्[1] ॥
नमत-भृगुसुतमद्भुताकृतिमखिलमुनिजन-वन्दितम् ।
जननपालननाशकारणनीलगिरिपतिमच्युतम् ॥ ६ ॥[2]

त्रिदशमुनिगणनाशहेतुं त्रिपुरहरवरदर्पितम् ।
रावणं हत्वा शिरोभि कन्दुकैरिव खेलितम् ॥
नमत-दशरथतनयमद्भुतमखिलमुनिजनवन्दितम् ।
जनन-पालन-नाशकारण-नीलगिरिपतिमच्युतम् ॥ ७ ॥

लाङ्गलायुधकोटिदर्शित नागसाह्वयघूर्णनम् ।
मुष्टिपातन-विहितमत्र प्रलम्बासुरचूर्णनम् ॥
नमत-हलधररूपमद्भुतमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारणनीलगिरिपतिमच्युतम् ॥ ८ ॥

गोपगोकुलरक्षणक्षणधारितातुल-भूभृतम् ।
नीलमणिमयदण्डसङ्गतमातपत्रमिवोद्धृतम् ॥
नमत-कंसासुरनिसूदनमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारणनीलगिरिपतिमच्युतम् ॥ ९ ॥

तुरगखुरपुटबल[3]धरा[4]तलमतुलखड्गवखण्डितम् ।
म्लेच्छकुलगल[5]नालमविकलमाशु येन सुसंहितम् ॥

---

1. क. संधितम । ख. संहितम् ।
2. ख. स्तोत्रोऽयं सप्तमावतारस्पेण उल्लिखितः ।
3. ख ग दल ।
4. क. ख. ग दिला ।
5. क. मल । ग. खल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नमत-कल्किनमुग्रमद्भुतमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारणनीलगिरिपतिमच्युतम् ॥ १० ॥

नीलगिरिपति-चरणसरसिजमत्तमधुकररूपिणा ।
रचितमेतत्पुरुषोत्तम[1] भूभुजामतिचारुणा ॥
नमत-दशविधरूपमद्भुतमखिलमुनिजन-वन्दितम् ।
जनन-पालन-नाशकारणनीलगिरिपतिमच्युतम् ॥ ११ ॥

गोपीजनालिङ्गितमध्यभागं
वेणुं धमन्तं भृशलोलनेत्रम् ।
कलेवरे प्रस्फुटरोमवृन्दं
नमामि कृष्णं जगदेककन्दम् ॥ ६ ॥

अधरे विनिहित वंशं चम्पककुसुमेन विरचितोत्तंसम् ।
विनतं धमन्तमंसं[2] वामं सततं भजामि[3] जितकंसम् ॥ ७ ॥

द्वितीयः प्रबन्धः

(गुर्जरी-रागेण गीयते)

सुललित-बर्हिण-चन्द्रकचूलम् ।
तदधरपरिवृतनववनमालम् ॥
मृगमदतिलक-चटुलतरभालम् ।
परिहिततनुतरपीतनिचोलम् ॥
कुसुमितनीपविटपितलमिलितम् ।
नमत मुरलिमृदुवादननिरतम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

श्रुतियुगविगलितकुण्डलयुगलम् ।
मणिगणभूषितमृदुगलनालम् ॥

---

1. क. ख. पुरुषोत्तम ।
2. क. ग. धरन्तमंसम् ।
3. ख. ग. नमामि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कौस्तुभशोभित पृथुतर हृदयम् ।
मलयज पङ्कविलेपितकायम् ॥ २ ॥

सरुचिरकङ्कण-शमणिबन्धम् ।
देहलताहित-शशधरगन्धम् ॥
मणिगणकाञ्चिसुसञ्चितभासम् ।
तरुणसुधाकरसुन्दरहासम् ॥ ३ ॥

नूपुररणित[1]मनोहरलीलम् ।
गोपीनयननिपातनलोलम् ॥
नरहरिचरणसरोरुहयुगलम् ।
भजत नृपतिगजपतिरतिविमलम् ॥ ४ ॥

केतकीमुकुल-काञ्चन-यष्टि-गन्धलुब्धमधुपावलिरेषा[2] ।
विभ्रति मनसिज-क्षितिमर्त्तुं राजतीव जयनीलपताका ॥ ८ ॥

केतक्या मुकुलेऽत्रसौरभवशाद्भृङ्गावली सङ्गता
चक्राकारतया यदेतदभितः सान्द्रा दरीदृश्यते[3] ।
तन्मन्ये स्मरभूपतेर्व्रजयिनः सौवर्णदण्डोज्ज्वलं
छत्रं केलिकलापसंधरचितं पुष्पाकरेण स्वयम् ॥ ६ ॥

तृतीयः प्रबन्धः

(वसन्तरागेण गीयते)

नवघनविपिने कोकिलकलरव-शवलितमधुरमधुपरुते ।
वहति सुरभिरतिशयमृतुरुदितो युवजनहृदयमनारतम् ॥
॥ ध्रुवपदमिदम् ॥

सुरुचिरयमुनातटनिकट-स्थितकुसुमितविविधमहीरुहे ॥ १ ॥
मलयपवन-चन्दननवदल धृतगुरुरोषसकम्पाधरपुटे ॥ २ ॥

---

1. क ललित ।
2. ग मधुपावलिमेषा ।
3. क. तरीदृश्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दरविकसितसहकारमुकुल कुलकपटकलितमदनाशुगे ॥ ३ ॥
गजपतिपुरुषोत्तमरचित मिदं सुखयतु नीलाचलपतिम् ॥ ४ ॥

इह हरिविरहविषण्णामागच्छन्तीं मनोजकृतबाधाम् ।
राधामालोक्य सखी तद्विङ्गितज्ञानकोविदा प्रोचे ॥ १० ॥

चतुर्थः प्रबन्धः

(गोण्डकिरीरागेण गीयते)

मन्थरागतिरधिकशून्यमालोकते
प्रखरनिःश्वसितचलकुचयुगलचेला ।
किमपि भावयति हृदविलुलदधर—
पल्लवामृदुतनुरहह[1] परिगलितनिजहेला ॥
नूनमेषा मदनशरपतनदूना
नन्दतनये सखी मम सततलीना ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

तारकाहारकरकातुहिनभानवो
नियत[2]मनुकुर्वते तनुरचिरकान्तिम् ।
नीपकोरकसदृशरोमततिराजिता-
स्फुटमिवावहति बहुमदनशरपङ्क्तिम् ॥ २ ॥

किं मुधा चिन्तया सेयमधियौवना
काल इव जृम्भते विरहिजनदाहो ।
ऋतुरयं माधवो नन्दतनयोऽपि
यन्मनसि संवसति वा रुचिररुचिवाही ॥ ३ ॥

कुसुमसुकुमारतनुरियमपि नवाङ्गना
विरहमतिदारुणं केन सहतां वा ।
मनसि संवसतु पुरुषोत्तम—
क्ष्मामुजो नीलगिरिवासिने गीतकृतसेवा ॥ ४ ॥

---

1. ख मृदिततनुरहह ।
2. ख. नित्य ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सविधमुपेतां राधिकां सा वयस्या
सखि किमिदमकाण्डे पाण्डिमा गण्डयोस्ते ।
तनुरति तनिमानं याति न स्थैर्य्यमेषा
गतिरपि समुपैतीत्याचचक्षे मिथस्ताम् ॥ ११ ॥

मनोगतां मन्मथबाणबाधा—
मावेदयन्तीव तनोर्विकारैः[1] ।
दीनानना वाचमुवाच राधा
तदा तदालोजनसम्मुखे सा ॥ १२ ॥

पञ्चमः प्रबन्धः

(रामकिरीरागेण[2] गीयते)

असितसरसिजगन्धलम्पटभृङ्गवेशम् ।
कुटिलकुन्तलवेणीशोभितचरमदेशम् ।
दधतमविरतमर्द्धशशधर चारुभालम्[3] ।
कामकार्म्मुकरम्यचञ्चलचिल्लिमालम् ॥
सखि विलोक्य विलासलम्पटमागताहम् ।
नन्दनन्दनमसमशरशरजातमोहम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

लम्बिमुक्ताफलमनोहरनासिकान्तम् ।
मध्यसङ्गततरलतारकचन्द्रकान्तम् ।
बन्धुजीवाधरनिवेशितवेणुदण्डम्[4] ।
चलितकुण्डलयुगलशशिरुचिरगण्डम् ॥ २ ॥

मसृणमलयजपङ्कलेपित सकलकायम् ।
विपुलवक्षोहारिकौस्तुभरुचिनिकायम् ।

---

1. क. दतनोर्विकारैः ।
2. ग. रामकेरी रागेण ।
3. ख. गरुडभालम् ।
4. ख. वेणुहस्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कनकगिरिसममध्यसङ्गतकाञ्चिमालम् ।
गगनमण्डलविचरदुडुगणहासिहेलम् ॥ ३ ॥

गोपवालसमूहसङ्गतकेलिलोलम् ।
पद्मकाननमध्यविलसित-हंसलीलम् ।
युवतिमानससारतस्कररूपशीलम् ।
नमति गजपतिरविनाशननन्दबालम् ॥ ४ ॥

मलयजघनसारस्फारभीतांशुरोचि—
र्मृदुमरुदुपचारामङ्गसङ्गं स्पृशन्तः ।
मम सखीमुखमुच्चैर्ये पुरा तन्वते ते
हृतविधिपरिपाकेनाधुना तापयन्ति ॥ १३ ॥

षष्ठः प्रबन्धः

(नाद—रामकिरीरागेण[1] गीयते)

मलयजपङ्कविलेपनमनिशं[2] पुटपाकाधिकदाहकरम् ।
व्यथयति शिशिरकरोऽपि मदङ्गं वत विनिहितगुरुपादभरम् ॥
॥ ध्रुवपदमिदम् ॥

सखि ! किमशरणा मरणे नियतं भाविनि विदधे कामकृते ।
प्रतिकर्त्तुं यदि किं च न कलये[3] तदपि विकारं रूंतनुते ॥ १ ॥

श्रुतिसुखदं पिकपञ्चमनादं यं च भजे गुरुमानमिदम् ।
स्मरदहने स हि भवति जीव हविरभिचाराहुतिमन्त्रपदम् ॥ २ ॥

अविरलविगलदमन्दपरागं[4] यं प्रविलोके कुसुमगतम् ।
उदयति स नयनपातविरोधिखररुचिकिरणकणोपमितम् ॥ ३ ॥

---

1. ग. रामकेरी रागेण ।
2. क. मधिकं ।
3. ख. किञ्चिन ।
4. ख. विमलदमन्दपरागम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति विरहातुरराधावचनं नृपपुरुषोत्तमगीतकृतम् ।
नीलाचलनिलयं[1] जगदीशं सुखयतु वल्लवदेहभृतम् ॥ ४ ॥

कालो वसन्तो नवयौवनाहं
लज्जाविशेषो मदनस्य पीड़ा[2] ।
जने दुरापे महती स्पृहा मे
न कोऽप्युपायः सखि जीवनाय[3] ॥ १४ ॥

उदञ्चत्करुणां वाचमित्थमाकर्ण्य[4] सा तदा ।
सखी समक्षं राधाया इदमूचे विचक्षणा ॥ १५ ॥

न काचिच्चिन्ता ते भवतु[5] सखि धैर्य्यव्ययकरी
पुरः प्राणत्राणं दयितमधिगन्तुं समुचितम् ।
घनाम्भोभिः सिक्ता क्वचिदपि हलाग्रेण दलिता
विना बीजैर्भूमिः फलमभिमतं नौ जनयति ॥ १६ ॥

अथ सा तद्वचनान्ते श्वःसानधिकान्मुहुर्विमुञ्चन्ती ।
ऊचे सखि समक्षं दिनमुखौ शोकगद्गदां वाणीम् ॥ १७ ॥

सप्तमः प्रबन्धः

(भैरवीरागेण[6] गीयते)

विरही सीमन्तिनी मारणे कारणं निजकुसुमबाणम् ।
मयि विमुञ्चति रुषा सन्तं मन्मथोऽविदितगुरुसारपरिमाणम् ॥
किं मया सखो विधेयम् ।
नन्दनन्दनकृते जीवनं देयम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क निलय ।
2. क पीवा ।
3. ख. जीवनाथ ।
4. क. वाचमिदमाकर्ण्य ।
5. क. भवती ।
6. ख. भैरवरागेण ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हरनयनघनदहनभस्मिते प्रेतभावं गते का वा ।
तत्र करुणा भवति दारुणे तव मे फलति नहि सततमपि सेवा ॥ २ ॥

दुरितपरिपाकमनुयायिनी दुर्दशा समुपैति[1] यैषा ।
कुसुममपि कुलिशमिव तन्वती तत्र मम जीवनेन सकृदपि काशा[2] ॥ ३ ॥

नीलगिरिपतिरचितसङ्गता नृपति पुरुषोत्तमे नेयम्[3] ।
विरचिता गीति रसानुमोदिनी[4] भावयतु सततं[5] सुखमपरमेयम् ॥ ४ ॥

ये सखी सुखमादधते जगति पदार्था जनस्य सकलस्य ।
ते यदि विपरीतार्थं मजन्ति का जीवनाशा मे ॥ १८ ॥

अष्टमः प्रबन्धः

(मारुधनाश्री-रागेण गीयते)

मम वपुरन्तरुपेता,[6] गाढं मलयजवाता ।
अधुना जीवनमेते, प्रसभं क्वापि नयन्ते ॥

अभिनवमदनमुदारं, त्रिभुवनयुवजनसारम् ।
याचे मुहुरिह दीना, सखि तं भवतीं पदलीना ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

यस्य दृगञ्चललीला, मदनमनोरमखेला ।
आकर्षति ममचित्तं, रज्जुवदिदमनिमित्तम ॥ २ ॥

यदतनुतनुपरभागं, कल्पित विविधभागम् ।
न च पुनरवलोकेऽहं, यदि विजहाम्यपि देहम् ॥ ३ ॥

---

1. क. ग. समुदयति ।
2. ख. कासा ।
3. क. पुरुषोत्तमेयम् ।
4. ख. रनुमोदिनी ।
5. क. भावयन्ति सन्ततं ।
6. क. वपुरतिरुपेता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राधाविरहनिबद्धं, पुररिपुचरितविशुद्धम् ।
नृपपुरुषोत्तमगीतं, सुखयतु हृदि समुदितम्[1] ॥ ४ ॥

मनोजन्मा धन्वी गिरिशहृदयोन्मादनकृती[2]
रुषा चापे बाणाननवरतमुत्पुङ्खयति चेत् ।
वयस्ये तत्किं स्यादहह निरुपाये मयि जने
विधेयं नादेयं परमिह मया जीवनमिदम् ॥ १६ ॥

अथातुर्रां[3] तामधिगत्य राधिका—
मनन्यकृत्यान्तरशान्तिविक्रियाम् ।
उदीत तत्प्राणविपर्य्ययव्यथा
सखीं समाश्वासयितुं जगाद सा ॥ २० ॥

विरहमनुभवन्तीमन्तिके त्वां दृगन्त
स्थिरविनिहिततारं माधवस्त्वामपश्यत् ।
न तदिति सखि चिन्ता सन्ततं त्वं दधीथाः
परिहरति चकोरः किं शरच्चन्द्रकान्तिम् ॥ २१ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्ये विरहिणीवर्णने विधुरराधो
नाम प्रथमः सर्गः[4] ।

---

1. क. ये सखिसुखमादधते इत्यारभ्य हृदि समुदितमित्यन्तं यावत् पुस्तकेऽस्मिन् नास्ति ।
2. ख. धन्मि गिरिशाहृदयोन्माथनकृतो ।
3. क. ख. अथान्तरां ।
4. ख. राधाकृष्णाभ्यां नम इत्यधिकलेखोऽस्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीयः सर्गः

सोत्कण्ठवैकुण्ठः

स चरतां[1] पृथु मन्मथव्यथा—
मथ राधामवलोक्य माधवः ।
रहसि व्यथमानमानसो
विललापानुभवन्मनो रुजम् ॥ १ ॥

नवमः प्रबन्धः

(कलहंसरागेण गीयते[2])

कुसुमसञ्चयचारुकबरीभारशोभा ।
हरिहरि तारकायुतगगनमण्डलमंजुलाभा ॥
मृगमदाहितितिलकसुललितभाललीला ।
हरिहरि मदननृपजयफलकपरिकलनैकशीला ॥
सुन्दरोमामचलतारं मन्दमन्दम् ।
हरिहरि लोकयन्ती निर्गता साविकृतिकन्दम् ॥
॥ ध्रुवपदमिदम् ॥ १

मयि तदाननलोकनाहितनयनकोणे ।
हरिहरि विशिखमभि सकलं विमुञ्चति पञ्चबाणे ॥
सपदि रिक्ततदीयतूणीरुचिविलासा[3] ।
हरिहरि लसति यत्तिलकुसुमसुषमानुपमनासा ॥ २ ॥
यदतिचञ्चललोचनालोकनसलज्जा ।
हरिहरि वसति हरिणी विपिनभुवि किं वत[4] सुसज्जा ॥

---

1. ख. सचरतां ।
2. ख रागोल्लेखो नास्ति ।
   ग. वलहसरागेण ।
3. क. रुचि विकालासा ।
4. ख. तव । ग. व्रत ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वलदकुण्ठितकण्ठशोभादानलोलम् ।
हरिहरि कम्बुरन्त[1]कुटिलहृदयं कलयसेऽलम् ॥ ३ ॥

मम यदाननचन्द्रसमुदितहासभासा ।
हरिहरि हृदयकमलं मुकुलितं वलते तदाशा ॥
मञ्जुगजपतिपुरुषोत्तमभूपतिगीतम् ।
हरिहरि जनयतादिदमाशुचित्तं सुखपरीतम् ॥ ४ ॥

द्विर्त्राणि कृच्छ्रं पुरतः क्षिपन्ती
पदानि तन्वी स्थिरदृष्टिभङ्ग्या ।
व्यावृत्य नीलोत्पलपत्रदाम्ना
मनोजकेलौ वृणुते स्म किं माम् ॥ २ ॥

दशमः प्रबन्धः

(भूपालरागेण गीयते)

मधुरमन्दविकारं दधती लोकनसम्भारम् ।
सा मयि वलदभिलाषविलासम् ।
विलसदपाङ्गतरङ्गिततारम् ॥
वलयितवदनसुधाकरम् ।
गलितहृदयधृतिसारम् ॥
स्मरगुरुसदुपदेशसविशेषा ।
हितनिजभावमतनुतोदारम् ॥
॥ ध्रुवपदमेदम् ॥ १ ॥

सादरमिव कलयन्ती मृदुलाशोकविटपभागम् ।
किञ्चिदुदञ्चितबाहावल्लीप्रकटितपृथुकुचतटपरभागम् ॥ २ ॥

प्रतितनुदेशविशेषे खेलनमन्तं मम चित्तम् ।
हाव[2]विभावितनाभीकूपे सुदृशो मग्नमभूदनुवृत्तम् ॥ ३ ॥

---

1. क. कम्बुरन्तर ।
2. ख. हार ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा विगता मृदुचेला स्फुटतनुलोमलता वाला ।
नीलाचलपतिमुदमातनुते नृपपुरुषोत्तमकविता लीला ॥ ४ ॥

स्वान्तं हन्त विवेकबोधविधुरं चिन्ता दुरन्ता तनोः
काञ्चः पञ्चशरीकृशाद[1]सुभगारम्भे प्रियं भावुकः ।
पुष्पेषोः सहजाश्च मन्मथकलाव्याकारिणो विभ्रमा-
स्तस्या मर्मभिदो भवन्ति तदहो जीवः कथं वर्त्तताम् ॥ ३ ॥

तामेवेक्षणमीक्षते श्रवणयोस्तद्वाचि वृत्तिः परं
तद्बिम्बाधरमाधुरीपरिचयं धत्ते रसज्ञा मम ।
तद्वक्त्राम्बुजसौरभं कलयते नासापरिष्वङ्गिणी
त्वक् तस्या हृदयं च तत्र यदि किं कामोऽपि वामायते ॥ ४ ॥

कौटिल्यं चिकुरे दृशोश्चपलता बिम्बाधरे रागिता
काठिन्यं हरिणीदृशः कुचयुगे दैन्यं तथा मध्यमे ।
तन्व्यामुत्पथगामिता मलिनता रोमावलौ चेदहो
तत्केनाङ्गगुणेन तत्र वलते स्वान्तं नितान्तं मम ॥ ५ ॥

एकादशः प्रबन्धः

(बहुलारागेण[2] गीयते)

चन्द्रचन्दनमन्दमलयगिरिमारुता ।
मिन्दन्ति मम हृदयमीषदपि सङ्गताः ॥
मुकुलकुलविलसदलिपटल—
झङ्कारा दहन्ति मल्लीलोकिता ।
विलसदभिरामतरमाकन्दमण्डली—
गलदतनुमकरन्दरसपानमुदिता ।
चटुलपञ्चमगिरा मोहयन्ति मानसं
हतविधेरहह मम सन्ततं परभृता ॥

---

1. क. कुसीद ।
2. क. ख. ग. बहुली रागेण ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदधुना तुदति सततम् ।
मामिति ललितरसवलितकामिनीवृत्तम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

सुतनुतनुसेवनादिव कलितमत्सरं ।
मदनममुमविशेषबोधविबुधं परम् ।
वेद्मि तदवयवकृतलोकनयनं ।
तदधुना वलितादरम् ।
नियतमपहाय मम हृदयमपगलदयं ।
भृशमपराधिनी निजजनकमपि गतदयम् ॥
श्रुतिसविधगमितगुण चापसर—
दिषुणा पीड़यति विरहिजनरोषणो दृढ़मयम् ॥ २ ॥

चूतनूतनचारुमुकुलततिरुद्गता
पीड़यति किञ्चिदपिनयनपथमागता ।
यदिह भुवि सुखजनकमन्यदपि कान्तं ।
तदपि संदहति चित्तम् ।
यदपि मम सहजनितमिदमहमानसं ।
तदधुना नियतमपहाय मामतिकृशम् ।
भजति केवलमचिरलोकितामवला—
मनवगत तदुपचितमावमाहित्तरसम् ॥ ३ ॥

मरुदयं खलु जगत्प्राणतामुपगतो
दक्षिणोऽपि हि वपुषि मामके परिगतो ।
निजजननसम्भवामसुपवनपालिं ।
पीड़यति कथमेव मे ।

भणति रसवलितनवगीतमिति मुरहरे
तदति[1] सुन्दरचरणकमलरसमधुकरे ।

---

1. ख. तदिति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निरतिशयसुखमनिशमविकलं तनुता—
मखिलजगन्नाथमिदं नृपतिपुरुषोत्तमे ॥ ४ ॥

इति बहुविलपन्तं कान्तमेकान्तकुञ्जे
मधुमथनमुपेत्य प्रीतिमुल्लासयन्ती ।
प्रतिमुहुरुदयन्तीं मन्मथोन्माथबाधा—
मकथयदथतथ्यां राधिकायाः वयस्या ॥ ६ ॥

द्वादशः प्रबन्धः

(सौराष्ट्रगुर्जरीरागेण गीयते)

रूपमेव विलसति सा तव चकितचकितं वीक्षते ।
स्थातुमिच्छति संमुखे वत केलिधामनि न रमते ॥
तव मुखाम्बुजवीक्षणक्षणबहुविकाराविशेषिता ।
सततमनसिजबाणसञ्चयदवहुताशनपोड़िता ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

कुचयुगे निःश्वसितमरुतामलिनीमानं कलयते ।
सविध संचरदालिवृन्दं[1] मन्दमपि न विलोकते ॥ २ ॥

पश्यति त्वामेव परितो झटिति बोधवशंगता ।
भ्रमति रोदिति वीतलज्जा त्वदभिसरणसुसज्जिता ॥ ३ ॥

स्वप्न भव मवदङ्गसङ्गसुखं सखीं प्रतिभाषते ।
पुरुषोत्तमनृपतिकृतहरिचरितगीतं विजयते ॥ ४ ॥

प्रत्यागमाशातिशयानुबद्ध[2]—
रूपं स्वरूपं समवेत्य कान्तम् ।
भवन्तमादनुसृत्य राधा
निवर्त्तते तीव्रमुदीतबाधा ॥ ७ ॥

1. क. सविधसंचदादालिवृन्दं ।
2. ख. प्रत्याशमाशातिशयानिबद्ध ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रयोदशः प्रबन्धः

(ललितरागेण गीयते)

मलयपवनमृदुचञ्चलपल्लव-विकसितभूरुहजातम् ।
मधुकृतमदवशमधुकरझंकृति-शङ्कितयुवजनचित्तम् ॥
वृन्दावनमनु सा, राधाभिलषति तव तनुसङ्गम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

त्वदमितगुणपरिचिन्तनलालस-मानसवृत्तिविशेषा ।
विघटितसकलविषयपरिसङ्गतिरपगतभोजनवेशा ॥ २ ॥

समुदितशशधरबिम्बमुदञ्चितरुचिमिव हुतवहपिण्डम् ।
कलयति विरहभरादथ धावति तमनुसृता वत चण्डम् ॥ ३ ॥

कुसुमविशिखजनितामय-तारण-कारणमिह भवसि त्वम् ।
गजपतिनृपपुरुषोत्तमगीतं जनयति हृदि रसिकत्वम् ॥ ४ ॥

स्वासान्मुञ्चति मन्दचन्दनमरुत्सङ्गे कुरङ्गेक्षणा
पश्यन्ती मकरन्दबिन्दुमवनौ बाष्पाम्बुना सिञ्चति ।
किंचोदञ्चितपञ्चमस्वरभरं श्रुत्वा पिकानां रुतं
कर्णौ सा पिदधाति नैव विरहे कुत्रापि धत्ते रतिम् ॥ ८ ॥

चतुर्दशः प्रबन्धः

(नारायणीगौड़ारागेण गीयते)

चूततरुनवमुकुललोकने विधुरा ।
सा निमीलयति निजलोचनेऽधीरा
अङ्गसङ्गीनमुदित शशिकिरणसहम् ।
परिहरति सपदि[1] गुरुजनिततनुदाहम् ॥

---

1. क. सपति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मदनकदनामयं क्षणमपि न सहते ।
मरणमेव हि परं सुभग कामयते ।।
।। ध्रुवपदमिदम् ।। १ ।।

कुसुमगलदति वहलमधुरमधुवलिते ।
वहति[1] चन्दनवनामोदभरभरिते ।।
अङ्गसङ्गिनि मरुति दक्षिणे वामा ।
मोहमुपयाति हतविधिविहितकामा[2] ।। २ ।।

छायाजनितमवदनुसरणरसया ।
सपदिमुदिता विरलपुलकितनिजया ।।
त्वदवयवसङ्गसुखमनवकलयन्ती ।
क्वासि दयेतेति शुचमेति विलपन्ती ।। ३ ।।

विरहहुतवहमहह कथमुदितमवला ।
नावकलये सखी वहति सा सरला ।।
नृपतिपुरुषोत्तमेनेदमुपरचितम् ।
नन्दयतु नीलगिरिपतिरचितगीतम् ।। ४ ।।

कण्ठे जीवं करकिशलये[3] गण्डपालिं दधाना
ध्यानं नित्यं वपुषि शकले[4] श्यामतां पाण्डुतां च ।
म्लानिं बिम्बाधरकिशलये लोचने वाष्पपूरं
तिष्ठत्येषा मम सहचरी किन्तु चित्ते भवन्तम् ।। ६ ।।

पञ्चदशः प्रबन्धः

(मुखारीरागेण गीयते)

तमसि घने प्रथमाने दुरितवेशनिधानम् ।
विदधाना बहुमनुते[5] न गहनमपि पन्थानम् ।

---

1. क. वहति वहति ।
2. ख. निहितकामा ।
3. ख. करसरसिजे ।
4. ख. सकले ।
5. क. बहुतमनुते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा मृदुला परमबला कामयते तव सङ्गम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

स्मरविवशा प्रणयिसखीं पृच्छति रजनीमानम् ।
उपगन्तुं केलिगृहं निश्चितभवदुपयानम् ॥ २ ॥

अभिसरणे निहितमतिं तामवकलय नितान्तम् ।
भव शरणं तदुपवनं सरमसमनुसर कान्तम् ॥ ३ ॥

भणति शुभं गीतमिदं नृपपुरुषोत्तमदेवे ।
जगदखिलं मोदयते कृतहरिपदयुगसेवे ॥ ४ ॥

प्रतिमुहुरुदयन्तीं मन्मथोन्माथवार्तां
मुररिपुरिति तथ्यां राधिकाया निशम्य ।
उपगमयितुमारादात्मनः सन्निधिं तां
मधुरगिरमुदीर्य्य प्राहिणोत्तद्वयस्याम् ॥ १० ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्ये नायिकाभिलाषवर्णने[1] सोत्कण्ठवैकुण्ठो
नाम द्वितीयः सर्गः ।

---

1. ख. विलास ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृतीयः सर्गः

मुदितराधः

अथ निजभवने राधानुभूय बाधामनङ्गदहनोत्थाम् ।
वलमानचित्तखेदं निशि निर्वेदं चकारोच्चैः ॥ १ ॥

षोड़शः प्रबन्धः

(वङ्गालगौड़ारागेण[1] गीयते)

मलयजपवने प्रसरति मदने मुञ्चति वाणनिकायम् ।
मिलति न दयिते[2] करुणाविरहिते कथमवलम्बे कायम् ।
न लभे वत कामम् । एकं गतमवकलये यामम्[3] ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

अनुकृतमणिते मधुकररणिते श्रुतिसुखमवरुन्धाने ।
अमवदभिमुखो यदि सा न सखी किमिह तदनुसन्धाने ॥ २ ॥

विचकिलकुसुमं समुदितसुषमं[4] मरुदुपनयति विकाशम् ।
पथि तिमिरघने दयितो[5] विजने मम न किमेति सकाशम् ॥ ३ ॥

परमिह शरणं लघु मम मरणं न सहे विरहमुदीतम् ।
सुखयतु रसिकं[6] जनयतु भविकं[7] नृपपुरुषोत्तमगीतम् ॥ ४ ॥

---

1. ख. वङ्गालवराड़ि ।
2. क. मिलतिदयिते ।
3. क. त्तामम् ।
4. क. समुदितसुषमभित्युल्लेखोनास्ति ।
5. ख. दयिते ।
6. क. सुखयतिरसिकम ।
7. क. जनयति भविकम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सरसिजकुड्मलकुहरे निवसन्मधुपायिनां निकरः ।
तज्जयति सन्ततं मामवलां झङ्कारहुंकृतिभिः ॥ २ ॥

सा सखीं सरभसं समुपेता
स्वीय सद्मनि रहो निवशन्तीम् ।
राधिकां प्रति मनोभववाधां
माधवस्य निजगाद दुरन्ताम् ॥ ३ ॥

सप्तदशः प्रबन्धः

(शुद्धवसन्तरागेण गीयते)

किशलयशयने विनिहिततनुरपि न परिजहाति सन्तापम् ।
त्वमिह कुसुमशरविवशा भवसीति कलयते परितापम् ॥

उपकुरु दयिततमम्[1] । सखि ! सुन्दरमभिसर पूरय गुरुकामम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

विमलनीलमणिललितकलेवरुचिरमपि[2] विरहे वलमानम् ।
द्विरददन्तनवकुन्ननकान्तिविकाशं नयते तनिमानम् ॥ २ ॥

अविचलमविकलकनकाचलमिव हृदं[3] जलनिधिगम्भीरम् ।
भ्रमिमिव[4] मरुता मधुना चपलं कलयति विलपति सधीरम्[5] ॥ ३ ॥

क्षणमपिमनुते युगमिव सहते सकृदपि न मदनपरिभावम्[6] ।
नृपपुरुषोत्तमकृतमिति गीतं जनयतु मुरजितहृदि भावम् ॥ ४ ॥

---

1. क. दैततमम् ।
2. क. रुचिमपि ।
3. ख. हृदयम् ।
4. क. भ्रममिव ।
5. क. शधीरम् ।
   ख. चाधीरम् ।
6. ख. सकृदपरिभाषम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घनतरमकरन्दस्यन्दसम्पातमीत्या
स्थगयति वकुलानां पल्लवैरङ्गमङ्गम् ।
भवति च परितापे तत्कृतेऽनन्यगत्या
रचयति तव हूतिं हन्त तारस्वरेण ॥ ४ ॥

नमते जपति चिन्तयति त्वां
त्वत्कथासु रमते त्वयि भावम् ।
केवलं कलयते त्वदृतेऽन्य—
न्न प्रियः समनुते पुरुषार्थम् ॥ ५ ॥

अष्टादशः प्रबन्धः

(मालश्रीरागेण गीयते)

श्रवणपथमनुविशति पिकनिकरकूजिते[1]
मधुरवचनामृतं सुमुखि ते मनुते ।
उदितं शशिविम्बमवलोकयन् सपदि ते
मुखकमलशङ्कया चुम्बितुं[2] यतते ॥

कुसुमशरनिकरपातपरिपीडितम् ।
सखि तमवकलय तव हृदयगतकान्तम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

सरसि विकसितविमलनोलसरसिजदलम्
तव नयनसंशयादनुसरति लोलम् ।

चिन्तया स भवतीं सविधमिलितामलम्
भावयन्ननुनयति नियतमतिवेलम् ॥ २ ॥

लिखति भवतीं रहसि मणितुमथ याचतेऽ—
नधिगते वचसि तव सपदि शुचमयते ।

---

1. क. निरकूजिते । ख. नकरकूजिते ।
2. क. चुम्बितम् । ख. चुम्भितुम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहिरुपागमरसं यावदभिलपते[1] ते
निजहृदयदारणं तावदारभते ॥ ३ ॥

स्वप्नभवदङ्गसङ्गमसुखे निर्भरम्
स्वजति[2] किशलयरुचिं[3] पिबति मुहुरधरम्[4] ।

नृपतिपुरुषोत्तमकृतं शृणुत सादरम्
हरिचरितगीतमिदमुदितरससारम् ॥ ४ ॥

दैर्घ्यं लोमलतागतं कलयते चिन्तासु वक्षोजयोः
स्थौल्यं निःश्वसिते कराधरपदच्छायां दृशोः क्षीणताम् ।
मध्यस्यावयवेषु कुन्तलरुचिं सम्मोहिनी स्वात्मनि
प्रेयांस्ते विपरीतवर्णरचनां नाम्नः परं चाश्रूणि ॥ ५ ॥

ऊनविंशः प्रबन्धः

(चिन्तादेशोरागेण गीयते)

मोहमुपेतं[5] तं युवनन्दनचन्दनपवने वहति घने ।
भवदुपगमकृतकैतवसन्धं सुहृदुपकुरुते केलिवने ।
ध्रुवमयते विपदम्[6] । अवधारय सखि न मृषावादम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

तव तनुसङ्गतकामनया हितहुतवहशङ्कविकरालम् ।
विकसित किंशुककुसुमकुलं प्रति धावति निपतितुमनुवेलम् ॥ २ ॥

हिमकरकरधनसाररजो मृगमदपरिशीलनपरिणाहम् ।
मरणमुपैतुं[7] स हि बहुमनुते न गणितविरहदहनदाहम् ॥ ३ ॥

---

1. क. यावदभिलपित । ख. यावदभिलसति ।
2. ख. स्वजयति ।
3. ख. किसलयरुचि ।
4. ख. मुहुरधरम् ।
5. क. मोहनमुपेतम् ।
6. क. विपदम् ।
7. ख. मरणमुपेतम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपचिनु सुकृतमुदञ्चयभावं जीवय निजहृदयेशानम् ।
पुरुषोत्तमनृपगीतं जनयतु मुररिपुसम्मदमहिमानम् ॥ ४ ॥

यावत्पुरो मिलसि भावनया सखि त्वं
यावच्च मोहमयते मदनानलार्त्तः ।
तावन्मनोरुजमयं लभते न दीर्घां
तस्यान्यदा न[1] विषया मनसोऽप्यवस्था ॥ ७ ॥

इति विरहावस्थां निशम्य दुस्थामुदञ्चितोत्कण्ठाम् ।
मदनशरपीड़िताङ्गी सपदि कृशाङ्गी बभूव सा दूना ॥ ८ ॥

विंशः प्रबन्धः

(कर्णाटरागेण गीयते)

समुदित शशधरबिम्बविड़म्बन माननकमलममलशोभम् ।
गलितनिमीलितनयनं लोके मम सुखचुम्बनधृतलोभम् ॥
मञ्जुनिकुञ्जगतं सुखसारम् । दयितमुपैतमुदितविकारम् ॥

॥ ध्रुवपदमिदम् ॥

मनासजतापविमोचनलोचनपथमनुपममनुगमयेयम् ।
तनुलतिकामथ चिरविरहरुजं सपदि मुदा परिशमयेयम् ॥ २ ॥

मधुरसुधारससोदरमादर कलिनमहमधरमधुपानम् ।
विदधे पृथुलनरोरुमि निदधेकुचयुगमपगतपरिधानम् ॥ ३ ॥

मुकुलबकुलदलशयने विजनेसम्प्रति कलये रतिसङ्गम् ।
नृपपुरुषोत्तमगीतं सुखयतुजनयतु भवभयभङ्गम्[2] ॥ ४ ॥

स्मरशरघृतातङ्के शङ्के लतान्तरनिह्नुते
प्रणयिनि पराशनादिनाभिसारविधौ[3] मुधा ।

---

1. ख. तस्यानदान ।
2. क. भवभवभयभङ्गं । ख. भवभयसङ्गं ।
3. क पराशनाभिसारविधौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किमिह निवसाम्येषा दोषा निराकृतदक्रिया
रमणसविधं रन्तुं गन्तुं तनोति सहायताम् ॥ ९ ॥

परम्परासञ्चितभावबन्धयो—
रवेत्य राधा मुरवैरिणोः सखी ।
मनोरथं केलिमहोत्सवाहितं
वचोऽनुकूलं मधुरं जगाद सा ॥ १० ॥

एकविंशः प्रबन्धः

(गोड़ीरागेण गीयते)

मधुमगयोदितमधुमधुरोऽयं मरुदनुसरति सलीलम् ।
उपचिनुते मानमिदं मदनमुपाहितहृदयमदम् ॥
कामयते तव सङ्गम् , स तदधुना[1] कुरु रतिरङ्गम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

विकसितकुसुमसमूहसमुद्गत सौरभसंभृतगर्भम् ।
केलिगृहं प्रमदकरं भज सखि ! निधुवन-सुखसारम् ॥ २ ॥

शीलय नीलनिचोलमुदञ्चय काञ्चनगुरुपरिलेपम् ।
घनतिमिरं प्रतिकूलं कलय न मुक्ताभरणकुलम् [2] ॥ ३ ॥

सफलय तरुणीकृतसुकृताहित[3] यौवनमगणितमानम् ।
हृदि तनुते परममुदं नृप पुरुषोत्तमगीतमिदम् ॥ ४ ॥

उल्लसत्प्रणयबन्धबन्धुरा[4]
सा सखी गदित[5] नर्मसंकथाम् ।
साभिलाषमवगत्य सत्वर
वेशमेतदुचितं समाददे ॥ ११ ॥

---

1. क. सतदधना ।
2. क. मुक्ताभरोकूलं ।
3. क. सुकृताहत ।
4. क. प्रणयबन्धुबन्धुरा ।
5. क. गदितपदो नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निम्नोन्नतपरिज्ञानविमूढा[1] गन्तुमुत्सुका ।
सूचोभेद्यं तमो दृष्ट्वा जगाम[2] गतसाध्वसा ॥ १२

उच्चण्ड-चण्डकरदीपशिखावलोढ
ब्रह्माण्डतालुजमसीत्रसरेणु-जालैः ।
वातावधूननवशादिव विप्रकीर्ण—
विश्वं विभाति परितः स्थगितं[3] तमोभिः ॥ १३ ॥

विरहितरुणीहत्या नित्यार्जितैरिव कल्मषै—
स्तिमिरनिकरैरिन्दोर्बिम्बं पिधाय विजृम्भितैः ।
स्थगितमधुना वर्त्मप्रेत्योनिकेतगतस्फुटं
मदनदहनज्वालालीलायितेन विलोक्यते ॥ १४ ॥

द्वाविंशः प्रबन्धः

(आभिरीरागेण गीयते)

कस्तूरीतिलकं सपरशं निटिलफलकसहितम् ।
निदधाति[4] पुरतो मदनं भ्रूधनुषा मिलितम् ।
स्मरविवशा घनतमसा पथि पिहिते गच्छति[5] राधा ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

कलयन्ती सुरपति मणिगणभूषणमनुरूपम् ।
भजमाना मृदुपरिकल्पितकालागुरुलेपम् ॥ २ ॥

कलरणितं संयमयन्ती मणिमञ्जीरयुगम् ।
परमेकं भावयमाना दयिततमं सुमगम् ॥ ३ ॥

---

1. क. परिज्ञानाविमूढा ।
2. क. जगाद ।
3. क. स्थगतं ।
4. ख. निदधाना ।
5. क. पतिन्यपहिते गच्छ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लघुचरणं विन्यसन्ती सङ्केताभिमुखम् ।
गीतमिदं नृपपुरुषोत्तमकृतमादिशतु सुखम् ॥ ४ ॥

मधुमथननिताम्तस्नेहसंधुक्षमाण—
स्मरहुतवहकीला दीप्यमानाङ्गवल्ली ।
पथि वहलतमिस्रा[1] भोगसन्दिह्यमाने
लघुपदमुपयान्ती प्राप सङ्केतकुञ्जम् ॥ १५ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्येऽभिसारिकावर्णने मुदितराधो
नाम तृतीयः सर्गः ।

---

1. क. वहनतमिश्रा ।
ख. बहुलतमिश्रा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्थः सर्गः

विमूढ़राधः

अथ निधुवनसिद्धिं वीक्ष्य मूर्त्तामिवैना—
मनिभृतपदपातज्ञाततत्सन्निधानाम् ।
मुररिपुरनुनिन्ये[1] राधिकां चाटुवादैः
श्रमजलमपनोय स्वीयचेलाञ्चलेन ॥ १ ॥

संवाहयामि चरणावपसारयामि
रेणुं दृढं परिरभे मृदुलाङ्गवल्लीम् ।
तन्वङ्गि संचरणखेदमुं विहाय
संकल्प[2]कल्पितरतोत्सवमारभेथाः ॥ २ ॥

प्रक्रान्ते सुरतमहोत्सवे तदानीं
राधाया मधुमथनः सकौतुकेन ।
चित्तस्य स्थितिमवगन्तुमेतदाख्या—
माख्यातुं समभिदधे कलावतीति ॥ ३ ॥

अथ रोषकषायिताशया
प्रियसङ्गं सपदि[3] प्रहाय सा ।
तव किं मम का[4] समं तया
विहर त्वं[5] कितवेत्युपाययौ ॥ ४ ॥

---

1. क. रम्ये ।
2. ख. सकल्प ।
3. ख सपद ।
4. क. ख. मयका ।
5. क. विरहत्वं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रयोविंशः प्रबन्धः

(कल्याणनाटरागेण गीयते)

स्खलितचरणगतिरुणितवदना ।
भ्रमणविसारितताम्रकनयना ॥
अगणितरमणानुनया ।
निरवर्त्तितलघुराधाविनया[1] ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

दशन[2]निपीड़नपरिलुलदधरा ।
खरनिःश्वसितविमोचनघोरा ॥ २ ॥

करमपरेण करेण नितान्तम् ।
घटयन्ती नवपल्लवकान्तम् ॥ ३ ॥

पुनरनुपैतं शपथं कुरुते ।
नृपपुरुषोत्तमगीतमुदयते ॥ ४ ॥

विपिने परिभ्रमन्तीमनवस्थितमार्गनिर्णयां कोपात् ।
राधामुपसि वयस्या दृष्ट्वावदत्तदन्तिकं[3] यान्तो ॥ ५ ॥

चतुर्विंशः प्रबन्धः

(ललितरागेण गीयते)

वदने श्रमजललवभरसंचितकान्ति भुवि[4]
प्रतिविम्बितभगण सुभगसम्मितरुचिरुचिरे ।
निधुवनविरतिसमुद्भवदुःसह
रोषपराभवमधुना सूचयति ध्रुवमतिविधुरे ॥

---

1. क. राधाऽविनया ।
2. क. वसन ।
3. क. वदे तदन्तिकं ।
   ख. वददे तदन्तिकं ।
4. क. भूति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विपिने बहलदलावलिभिकरतलभुवि
घनहिमशोकरललितपरागनिरन्तरपरिरचिते[1] ।
रजनीविरतिसमयोदितपरभृतरुतपरिशङ्कित
विरहि मनसि किमियं वत चरति तते ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

गमने श्लथकवरीदरसङ्गलदुज्ज्वल
गर्भकनिर्मलतरणिदुहितृजलसंमिलदमरधुनिम्[2] ।
बोधयति प्रियसङ्गमसमयरुषा
विषयद्रुमभृतभ पे गणयति नासममृदमवनोम् ॥ २ ॥

नयने विकसितकोकनदोपम सविशेषाहित
शोणिमवति नि विरिषमतिश्रमदूरवहिते ।
नभसि सुसंभृतजलधरधारानिकर
सहोदरमविरललोतकसंभरमुपचिनुते ॥ ३ ॥

विजने विगतभयानिलकम्पितपल्लव
चपलिमसम्भतचलदधरा न च मामुत परिचिनुते ।
गीतमिदं पुरुषोत्तमनृपतिभणितममृतोपम—
ममितमवाधि-परिश्रममपनयते ॥ ४ ॥

अथ सविधमुपेतया तया सा निभृतनिकुञ्जगृहे सखी निविश्य ।
असकृदनुयुजो परोपहेतुं तदमिदधे सकलं ततश्च राधा ॥ ६ ॥

प्रबोधिता सा बहुधा वयस्यया
वचोभिरासञ्जितयुक्तिभिस्तया ।
न मन्यमाना रुषमात्मनो हिता—
मवापनिर्वेदमनङ्गमोहिता ॥ ७ ॥

---

1. ख. परिनिचिते ।
क. दमलधुनीम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चविंशः प्रबन्धः

(भूपालरागेण गीयते)

कामं[1] केलिकलाजनितं मे मन[2] श्रममपि सहते ।
यस्तं सम्प्रति हित्वा हृदयं स्थातुं वत वलते ।
सखि दयिततमम् । किमहं मूढा निरकाशयमपि तम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

किञ्चन कृत्यमयं कलयन्नपि हृतिं मम कुरुते ।
सोऽहं पुनरवधीरितकामा वामा तस्य[3] रते ॥ २ ॥

स खलु निमोलनसमयेऽपि निजे विरहं मम तनुते ।
कथमिदमधुना जीवनहतकं तिष्ठति न तमयते ॥ ३ ॥

प्रणयिनमेनं पुनरुपयातं कथमचिरेण लभे ।
नृपपुरुषोत्तमगीतं सततं मतिमादिशतु शुभे ॥ ४ ॥

तानि प्रियाणि वचनानि तदव्यलीकं
प्रेमप्रबुद्धमदनानि तदिङ्गितानि ।
ते सम्भ्रमारतिषु मन्मथतन्त्रसिद्धा—
श्चित्तं वहन्ति मदयन्ति च साम्प्रतं मे ॥ ८ ॥

षड्विंशः प्रबन्धः

(केदारगौड़रागेण गीयते)

मधुरमधुरसमत्तमधुकरमञ्जुगुञ्जितमञ्जुले ।
कुञ्जधामनि केलिशयने रचितशयनं शीतले ।
चटुलचाटुपटोयसा वचसानुरञ्जितमानसम् ।
प्रणयकलहलवेऽपि मम परिकलितजनितागसम् ॥

---

1. ख. काम ।
2. क. मेन । ख. प्रेम न ।
3. ख. वामातरस्य ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तमपि कान्तमिन्दुसुन्दरमहह किमिदं मोहिता ।
आगमं परिहाय कुपिता सुरतसुखभरवञ्चिता ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

मृदुलकरकमलानुलालित[1] चरणगमनरुजापहम् ।
निविड़कुचपरिरम्भ सम्भ्रमनिरतिसहितसुखावहम् ।
श्रमजजीवन[2] विन्दुवृन्दममन्दवीजनकर्म्मणा ।
मोचयन्तमनन्तहिमजलमज्जनाहित[3]शर्म्मणा ॥ २ ॥

शपथशतमुपगन्तुमन्तिकमसकृदमितगुणाकरम् ।
विदधतं दधतं करे चलदञ्चलं मम सादरम् ।
कुसुमसायकसायकप्रथमानमानसबाधया ।
कवलितं पृथुसुरतसम्भ्रमविगमिताखिलबोधया ॥ ३ ॥

अगणितापदुपागतया[4] मुदितरुषि मयि सादरम् ।
प्लुतगिरा मम रचितदूतिं मदनविग्रहसुन्दरम् ॥
नीलगिरिपतिसम्मदं नृपपुरुषोत्तमभाषितम् ।
दिशतु गुरुकलहान्तरितया राधया विरहोदितम् ॥ ४ ॥

किं मया न गणितो मधुमासः
प्रस्मृतः कथमनङ्गजतापः ।
किं मयि प्रणयिनाप्यपराद्धं
येन साम्प्रतमहं परिखिद्ये[5] ॥ ६ ॥

विरहमसहमाना विभ्रती सानुतापं
मधुमथनगुणाली स्पन्दितस्वान्तवृत्तिः ।
स्वसविधमुपनेतुं भूय एवाचिरेण
स्मरशरविकलाङ्गी तामवादीद्वयस्याम् ॥ १० ॥

---

1. क ललित ।
2. क. श्रमजलजीवन ।
3. ख. मधुलाहित ।
4. क. अगणितापदपागताया ।
5. क. परिखेदे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सप्तविंशः प्रबन्धः

(देशीरागेण गीयते)

आलीदानीमुदारे कुञ्जमन्दिरे सङ्केतम् ।
सञ्चयन्ती संलापं कुर्वती भजे कान्तम् ।
तदङ्गसङ्गमङ्गलं संगाढं भावयेयं
कामं संपूरयेयं नितान्तम् ॥
आलीदानीमहं ते कामये पदं गाढं
सदापयन्तो भूयोऽमुं सन्निधापये नाथम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

आलीदानीमनङ्गे बाणसञ्चयं ज्यावन्धे[1]
सन्दधाने जाये भूयो विधानसंमूढा ।
मदङ्गालिङ्गनकृते गाढं किम्बावलम्बे
जाने तन्नातिमोहनिरूढा ॥ २ ॥

आलोदानीमनन्दे कुञ्जमन्दिरे रम्ये
संवेशिताङ्गी गण्डाभोगे लभे मुखासङ्गम् ।
यथा तं केलिसङ्गरे जेतारं वा
जयेयं स्तवे भूयो गुरुं तदानङ्गम् ॥ ३ ॥

आलोदानीमुदिते पुरुषायिते[3] सम्भोगे
वपुषि[4] स्वेदायिते[5] नाधिशायिता नूनम्[6] ।
कृतं श्रीपुरुषोत्तमेनेदं
मोदं विधत्ते गीतं राधानुलापसम्भिन्नम् ॥ ४ ॥

---

1. क. यावन्धे ।
2. ख. ग. यदा ।
3. ख. पुरुषा श्ते ।
4. क. ग. वक्षसि ।
5. क. ग. स्वेदायेते ।
   ख. स्वेजायेते ।
6. क. तनुम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहमिह परिपाकं दारुणं चिन्तयन्तो
न सहचरिविमूढा यद्यनिष्टे निविष्टा ।
उपकुरु तदिदानीमन्तिकं साम्प्रतं मे
सविनयमनुनीय प्रापय प्राणनाथम् ॥ ११ ॥

अथानुतापविधुरं राधिकाया वचः सखी ।
निशम्य त्वरया दूना[1] हरेरन्तिकमन्वगात्[2] ॥ १२ ॥

अनादृत्य क्रीडामनृतकृतगोत्रस्खलनजं
परितापं धृत्वानुनयमगृहीत्वान्धतमसे ।
गतायां राधायां प्रणयभरभङ्गातिविकलो
विलेभे निर्वेदं परिगलितमोदं मुरहरः ॥ १३ ॥

अष्टाविंशः प्रबन्धः

(शुद्धनाटरागेण गीयते)

घनतिमिरचर[3]निशाचरभीकर वनभुवि नाहृतहितपरिवारा ।
अगणितविपथचरणविनिवेशनमनुदितभयभरसुखसंसारा ॥
सा सरला मयि कथमनिविनया ।
रुषमुपगमिता मृदुतरहृदया ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

मयि करतलमिलदविरलनीवीबन्धविमोचननिरतेऽधीरा ।
हिमकरमणितरुणीव निरन्तरजललवदन्तुरिता सविकारा ॥ २ ॥

दृढपरिरम्भविलाससमुद्गतपुलकपटलवलिता खलदेहा ।
छुरितं सुखं मयि[4] जनयति कामं स्तम्भमुपैति च विपुलारोहा ॥ ३ ॥

---

1. क. यदुना ।
2. क. मन्वयात् ।
3. ख ग चय ।
4. ख मद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथमपि चलति विहाय मदन्तिकमिव निजजीवं मयि निदधाना ।
नृपपुरुषोत्तमकृतिरियमुदयति मुररिपुकेलिकलाकुशलमाना ॥ ४ ॥

यामि कुत्र करवाणि च किम्वा
तां कथं प्रणयिनीमवलोके ।
इत्थमाकुलतयाकृतिशून्यं
क्वापि न स्थितिमुपैति मनो मे ॥ १४ ॥

मनोजबाण प्रथमानवाधया
सखी नियुक्ता समुपेत्य राधया ।
भ्रमन्तमादवलोक्य माधवं
वचोऽनुकूलं निजगाद[1] सादरम् ॥ १५ ॥

ऊनत्रिंशः प्रबन्धः

(काम्भोजीरागेण गीयते)

अपि सा भवता विगुणा तव परिचरणा निपुणा ।
अनुगमनीथा मृदुला करुणासागरलघुपदमबला ॥
तव परमिह सा शरणं वाञ्छति विरहाकुलिताचरणम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

निजमृदुलगिरा सुधया मृतसंजीवनपरया ।
जीवयतामतिदूनामिह सा मनसिजदहनासहना ॥ २ ॥

वहलगुञ्जदलिपुञ्जे कुसुमितकुञ्जनिकुञ्जे ।
नवदलसुललितशयने क्षणमुपकुरुतामतिमृदुपवने ॥ ३ ॥

राधाविरहचरितं[2] रसमरसम्भरचित्तम्[3] ।
नृपपुरुषोत्तममणितं सुखयतु रसिकजनाननवरतम् ॥ ४ ॥

---

1. क. वचोऽनुकूल्या निजगाद ।
2. ख. चरित्रं ।
3. ख. चित्रमे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हतव्रीड़ाक्रीड़ानुगतमनसा दीनवचसा
भवन्तं सा कान्तं सुभगसममीष्टेति[1] सततम्।
रतान्ते निष्क्रान्ते कुचकलशयोः पत्रमकरी-
विधौ चित्रं तत्र प्रणयसमयं नातिगमय ॥ १६ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्ये कलहान्तरितावर्णने विमूढ़राधो
नाम चतुर्थः सर्गः।

1. क. ख. सममीष्टौति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चमः सर्गः

विधग्धमाधवः

अथ तपनसुतातटी समीपे
वकुलवनान्तरमाधवीनिकुञ्जे ।
उपशमयितुमाशु राधिकां तां
कृतसमयो मुरजित्सखीं न्ययुङ्क्तः ॥ १ ॥

भुजगभवनं[1] भानौ गाढान्धकारजिघांसया
प्रविशति तदा रोषावेशारुणीकृतवर्ष्मणि ।
चिरसमुदयद्वैरोद्रेकादनुज्झितमत्सरं
सपदि तदुपाक्रान्तं कृत्स्नं जगज्जगृहे तमः ॥ २ ॥

अत्रान्तरे छलकृते[2] प्रणयापराधे
राधां विरोषणतयापगतां निशम्य ।
नागेन्द्रमङ्कुश इव प्रसभं सुदामा
सङ्केतकुञ्जगमनादरुणन्मुरारिम् ॥ ३ ॥

अथ सहचरीनर्म्मालापं निशम्य समुत्सुकां
तमसि वहले गत्वा लीना[3]नुकुञ्जगृहान्तरम् ।
मुररिपुमनालोक्य म्लाननाश्रुमुखी मिथः
क्वचिदपि लतामध्ये राधा शुशोच निषेदुषी ॥ ४ ॥

---

1. क. भुवनं ।
2. ख. अत्रान्तरेसलकृते ।
3. ख. ग. लीला ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिंशः प्रबन्धः

(शुद्धवराड़ोरागेण गीयते)

उदचलदाशु सखीजनवचसा ।
शठचरिते दयिते धृतमनसा ॥
मयि न तदीयं सदयं हृदयम् ।
मन्ये मम शरणं यमनिलयम् ॥
उपरत जीवनधृतिसुखसारा ।
विदधे सम्प्रति किमिहमधीरा ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

व्यधितसखो यदि सुहृदयभेदम् ।
किमिह करोमि मुधा गुरुखेदम् ॥
कैतवभावनिबन्धननियतम् ।
पुनरुपयामि किमेनं[1] दयितम् ॥ २ ॥

निवसति स मृदुलमलयसमीरे ।
किम्वा तदितरकुञ्जकुटीरे ॥
तिमिरतिरोहित नयनविसारा ।
तदवाकलयं[2] न धृतविकारा ॥ ३ ॥

अपयानो यदि गमनविलम्बे ।
सममतदद्य किमहमवलम्बे[3] ॥
नृपपुरुषोत्तमकृतमिति गीतम् ।
मुररिपुरचितनिबन्धनपूतम्[4] ॥ ४ ॥

उपचितमदनविकारा निरहंकारा लतागृहं गत्वा ।
वितथपरिश्रमविवशा नैव हताशा धृतिं क्षमा[5] धर्त्तुम् ॥ ५ ॥

---

1. क. किमेवम् ।
2. क. तवबाकलयं ।
3. क मम तदद्य किमिहमलम्बे ।
4. ख. निबद्धनपूतम् ।
5. क. यमे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकत्रिंशः प्रबन्धः

(ककुभरागेण गीयते)

किमवधारितचरणनिपतनचाटुवादा ।
आगमं परिहाय रमणं वलितखेदा ॥
वञ्चिता दयितेन[1] तेन विगलितभावम् ।
नियतमहह दधामि[2] सम्प्रति न हतजीवम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

मदनुसरणपरायणं[3] कलितांशुकान्तम् ।
न परिकुपितालोकयं परभावतान्तम् ॥ २ ॥

केलिकौतुकसमयकृतमनृतापराधम् ।
जानन्तो न समाचरं किमु गुरुविरोधम् ॥ ३ ॥

नीलगिरिपतिचरितपूतमिदं निकामम् ।
पुरुषोत्तमनृपतिगीतं दिशतु कामम् ॥ ४ ॥

वने भ्रमन्त्या न मयेक्षितः प्रियः
पुनः सखी वानुसृता तदन्तिकम् ।
गतागतोत्थश्रमसनस्य साक्षिणौ
मदन्तिके केवलमस्ति यामिनी ॥ ६ ॥

द्वात्रिंशः प्रबन्धः

(नारायणदेशाख्यरागेण गीयते)

हिमयमुनाजलशीकरशीतल-निर्मलवृन्दावनविपिने ।
मधुकरझङ्कृतिसङ्कुलकोकिल कलरवरचितहृदयमदने ॥

---

1. ख. कितवेन ।
2. क. ग. दधासि ।
3. क. मदनसरण्यपरायणम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हतविधिवशगतया, इह समलम्भि सह तया न मया ।
॥ ध्रुवपदमिदम् ॥ १ ॥

घनमकरन्दरसं दधता मरुता[1] मृदुकम्पिततरुमाले ।
गलितपरागभरा दलावलिवलिते सम्भूतं मधुकाले ॥ २ ॥

विरहिहृदयगुरुदारणकारण[2] शुककुलसुरसमणितिसारे ।
अभिनवकुसुमितमल्लीमतल्ली[3] वल्लरीवलयित सहकारे ॥ ३ ॥

विदधति कुसुमशराशुगसंचय संचयमनुमोदित कामे ।
दिशतु नृपति पुरुषोत्तमगीतं हरिचरणे मतिमभिरामे[4] ॥ ४ ॥

विलीनप्रेमाणं तमवकलयं नैव शिथिलो—
नुरागस्तस्मिन्मे स खलु बहुशो विप्रलभते ।
व्यलीकं तन्मन्ये पुनरहमहो सम्प्रति च तं[5]
तथैव प्रत्याशा सततमनुबध्नाति कितवम् ॥ ७ ॥

त्रयस्त्रिंशः प्रबन्धः

(छायानाटरागेण गीयते)

यदि पुनरधुना सविधमुपेतं
सहचरममुमहमवलोके ।
सविनयमनुनयमारचयन्ती[6]
न हि निपतामि विरहशोके ॥
किं न विचिन्तितमन्तकलोलम्[7] ।
मदनकदनमिदमतिवेलम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ख. मरता ।
2. क. दारुणकारण । ख. दरुण वारुण ।
3. क. वल्लीतमल्ली ।
4. ख. हरिचरणमतिमभिरेमे ।
5. ख. चितम् ।
6. क. मारचन्तो ।
7. ख. लीनम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनियतभावनिबन्धनकलुषं
न पुरुषहृदयं[1] कलयन्ती ।
हन्त तमन्तिकमिलितमसुं च[2]
परुषमनल्पं प्रलपन्ती ॥ २ ॥

यदि पुनरुदयति सुकृतममन्दं
तदनुभवामि सुरतसारम् ।
अविदितदयित निवासनिकुञ्जे
विदधे वा कथमभिसारम् ॥ ३ ॥

पुनरुपगमयति सम्प्रति किं वा
तमिह सखी भृशमनुनीतम् ।
मुररिपुसम्मदमातनुते
नृपपुरुषोत्तमकृतगीतम् ॥ ४ ॥

तमोभिः कालुष्यं जगति भजमाने द्विजगणैः
क्वचिल्लोनं तारा कुसुमवलितध्वान्तकबरीम् ।
प्रगल्भामभ्येत्य स्वपिति च सुखं पल्लवकुलं
त्रियामां निष्कम्पं तदिह तटते किं नु करवै[3] ॥ ८ ॥

अथ त्यक्त्वा मानं सविधमुपयातां मुरभिदो
विषीदन्तीं राधा क्व चिदपि लतावेश्मनि मिथः ।
परिज्ञातुं तस्या निधुवनकथानां परिणतिं[4]
निशान्ते राच्छन्ती वनभुवि लुलोके सहचरी ॥ ९ ॥

---

1. क. ख. हृदयम् ।
2. ख. ममुञ्चं ।
3. ख. कृत वै ।
4. ख. परिगतिम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सापि तत्र सविधे निवसन्तोमश्रुनिर्झरपरिप्लुत वक्त्राम्[1] ।
राधिका सहचरीं तदुदश्रां विप्रलम्भचरितं स्वमवोचत् ॥ १० ॥

चतुस्त्रिंशः प्रबन्धः

(मल्लाररागेण गीयते)

चन्द्रचन्दनघन[2]मलयवनपवन[3] सङ्गतिरपि न जनयति रतिम् ।
चूतचम्पकनवमालविका नवकेतक्योऽपि न ददति धृतिम् ॥
किं सखि विदधे किमु संनिदधे ।
स्वयमपि सम्प्रति वल्लभसविधे ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

नन्दनन्दनतनुरुचिविगलदतनुमद इव कुसुमशरो नियतम् ।
तत्र सन्दितघनमाववलितमनसं मामनुतनुते कुपितम् ॥ २ ॥

अङ्गसौरभभरसूचितपरिसरयमुनातटगतकुञ्जतलम् ।
मानसम्भृतमतिरगणितपरिणतिरहह तमनु किमु नोदचलम् ॥ ३ ॥

नाथमाहतरतिसुखमरपरिचितिमधुना पुनरपि कुत्र लभे ।
पुरुषोत्तमगजपतिकृतिमनुभजमतिरपि वलतामतनु शुभे ॥ ४ ॥

आसादिताः कति न केलिकथाः पुरा वा
यत्रेक्षितं प्रणयिना न कृतं व्यलीकम्[4] ।
यत्कैतवं मयि सखि[5] प्रसमं प्रणोतं
तेनाद्य मां प्रतिहतोत्सव एष लोकः ॥ ११ ॥

---

1. क. वस्त्रां ।
2. ख. चन्द्रकचन्दनघन ।
3. क. मलयपवनपवन ।
4. क. विलोकं ।
5. ख. सखि मयि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चत्रिंशः प्रबन्धः

(भैरवीरागेण गीयते)

किं मयापि[1] हताशया सखि केलिकौतुकलोलया ।
वारितो न समागतो मम सन्निधिं सकुशीलया ॥
कुञ्जगृहमुपलालिता तव मृदुगिराहमुपागमम् ।
वञ्चिता कितवेन तेन पुनरवापं सङ्गमम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

यदि स नियतं प्रणयमहितं कामुको मयि कलयते ।
वहलकोकिलकाकली किमु तं न मद्दते मदयते[2] ॥ २ ॥

नालिमालागुणलता न च कुसुमसन्ततिरिपुकुलम् ।
रतिपतेरवलोक्य क्व यदिदं वहति नहि स हृदाकुलम् ॥ ३ ॥

विरतिभियमपि याति[3] रजनी विफलमेव मयासितम् ।
दिशतु भविकमनारतं नृपपुरुषोत्तममापितम् ॥ ४ ॥

घनतिमिरमसीभिराचिताङ्गा
नवनिरुहा ननु वेलमोत्तमाणा ।
तमुपगतमिव प्रतात्य कृत्स्नां
रजनीमनघमिमामहं विरामम् ॥ १२ ॥

षट्त्रिंशः प्रबन्धः

(दीपकरागेण गीयते)

कृतिनिपुणा[4] मुदितगुणामनुसरति प्रियरामाम् ।
सहि विजने केलिवने पूरितनिधुवनकामाम् ॥
ध्रुवमधुना[5] मम विधिना हता भव भविकाशा ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ग. ख. कयापि ।
2. क. 'मदयते' लेखो नास्ति ।
3. ख. मपयाति ।
4. कं. इतिनिपुणा ।
5. ख. भूतमधुना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधुसमयजनितमयं पश्यसि सखि न किमेनम् ।
मम हृदयविगलदयं कृन्तति योऽयमनूनम् ॥ २ ॥

इह मुदिता व्रजवनिता या परिपश्यति कृष्णम् ।
किमधिगतं सुकृतशतं न तया केलिसतृष्णम् ॥ ३ ॥

कथमपि तं शठदयितं त्यजति न हृदयं सततम्[1] ।
गीतमिदं दिशतु मुदं नृपपुरुषोत्तममणितम् ॥ ४ ॥

उन्मीलत्कलनादकोकिलकुलप्रारब्धकोलाहलै—
र्वाचाला विकचप्रसूनविसरत्सौरभ्य लोलाजुषः[2] ।
एते सम्प्रति कोकशोकदहनक्लेशच्छिदो मारुता—
श्चित्तं हन्त दहन्ति मन्मथजया प्रौढ़िक्रियाहेतवः ॥ १२ ॥

व्यतीताः प्रारम्भाः[3] प्रणयबहुमानोऽपि गलितो
दुराशा याता मे परिणतिमियं प्राणितुमपि ।
यथेष्टं चेष्टन्तां विरहिवधविख्यातयशसो
विभावामन्येते स्मरमधुसुधांशुप्रभृतयः ॥ १४ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्येविप्रलब्धार्णने विगन्धमाधवो
नाम पञ्चमः सर्गः ।

---

1. ख. सन्तत ।
2. क. भूपः ।
3. ख. प्रारब्धाः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षष्ठः सर्गः

संक्षुब्धराधः

मुरारिरपि राधाया विप्रलम्भकृतां दशाम्।
निशम्य सख्या कथितामनुतापमवाप्तवान्॥ १॥

अथ सा कृतसङ्केता निशागमे सङ्गमलङ्कर्तुम्[1]।
मदनशरविकलाङ्गी[2]मुपेत्य राधां सखी प्रोचे॥ २॥

सप्तत्रिंशः प्रबन्धः

(घण्टारवरागेण[3] गीयते)

किं मया वत सुहृदये कृतमहितमदये सन्ततम्।
वदति मन्मथबाणसंमथनाकुलं[4] स इति नियतम्॥
सखि सुन्दरमेनमादरविरहितं ते वल्लभम्।
कलय सङ्गममोदविभ्रममपि न[5] नूनं[6] दुर्ल्लभम्॥
ध्रुवपदमिदम्॥ १॥

केलिकौतुकसमयघातुकमपि करुणया मामियम्।
नावधीरयति प्रियं वदतीति धृतदृढपरिचयम्॥ २॥

---

1. ग. सङ्गमङ्गलं कर्त्तुं।
2. ख. विह्वलाङ्गी।
3. ख. घण्टारवेण।
4. ग. सम्मथनाकुलं।
5. क. 'न' इत्युल्लेखो नास्ति।
6. ग. नुतं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुञ्जधामनि केलिसीमनि रचय सहचरीसङ्गमम् ।
मामुदीरयतीति धारय तद्दिह[1] विज्ञसितमुद्यमम् ॥ ३ ॥

सन्निधिं तव सुरतवैभवमेतुमलमुपयाचते ।
पुरुषोत्तमनृपतिगीतं हृदवकलयन्मोदते ॥ ४ ॥

आचार्यकं भदन तन्त्रविधौ[2] स यत्र
कर्त्तुं व्यधत्त समयं सखि माधवस्ते ।
तत्रैव कुञ्जभवने दयितेन तेन
कामं प्रपूरय चिरादभिवाञ्छितानि ॥ ३ ॥

तदा मध्ये तोयं नवमुकुलबद्धाञ्जलिपुटां[3]
तपस्यन्तीं[4] दृष्ट्वा विरहपरिखिन्नां कुमुदिनीम् ।
परिरम्भं चक्रे विधुरुदयमभ्येत्यमृदु भै :
करैः ज्योत्स्नारम्भा[5]दुपरचितसाकूतहसितम्[6] ॥ ४ ॥

अथ सा तदीयवचसा प्रसाधनं राधिका विधायासु[7] ।
कल्पितरतिसम्भारा केलिनिकुञ्जे सखीमुचे ॥ ५ ॥

अष्टात्रिंशः प्रबन्धः

(कोलाहलरागेण गीयते)

शि शिरशीतलमञ्जुवञ्जुलं मृदुलकिशलयं सङ्कुलम् ।
विरचितं रमणोचितं लघु शयनमिदमिह निर्मलम् ॥

---

1. ख. तदह ।
2. क. ख. तन्त्रविधौ ।
3. ख. पुटम् ।
4. ख. तपस्यन्तीं ।
   ख. तपस्यन्दी ।
5. ख. ग. ज्योत्स्नादम्भा ।
6. ग. हसितं ।
7. ग. विधयासाशु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सखि: कदा दयितं लभे व्रजकुले महितम् ।
मदनसुन्दररुचिमनोहरममलतनुललितं हितम् ॥
ध्रुवपदमिदम् ॥ १ ॥

किरटो[1]कवलिततिमिरशोभित केलिकुञ्जकुटीरकम् ।
विमलमणिमयदीपसञ्चयमकरवं सुखकारकम् ॥ २ ॥

रचितहिमकरशकलसङ्कर[2]नागवल्लीवीटिका ।
वनहिता करीदन्तरुचिपरिशोभिताधररञ्जिका[3] ॥ ३ ॥

पश्य विकसितकुसुमविरचित दामलेपनसहकृतम् ।
गीतमुदयति चारुगजपतिपुरुषोत्तममापितम् ॥ ४ ॥

सख्या श्रीमधुसम्पदा सहभवद्विश्रम्भलीला[4] कथा ।
कूतानन्दित पञ्चबाणतरुणीमुत्काट्टहासत्विषः ।
उद्यामद्युतयः पतन्ति शशिनः प्रत्रान्तरैरन्तरा
वल्ली धामघनप्रकीर्णविकसन्मल्लीप्रसूनश्रियः ॥ ६ ॥

दुरीकृतकनककिङ्किणिका निबद्ध
काञ्चीगुणः सखि रणन्मणिनूपुराश्च ।
एतौ रहः सुरत-चौर्य्यविशारदानां
यूनां रहस्यचरितं स्फुटमादधाते ॥ ७ ॥

---

1. ख. ग. किरण ।
2. ख. शक्कर ।
3. क. रंजता ।
4. ख. लीना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऊनचत्वारिंशः प्रबन्धः

(शङ्कराभरणरागेण गीयते)

हिमकरकर[1]कवलित[2]घनतिमिरं वनमुपरतरुत[3]शकुनिकुलम् ।
दूरविभावितजनसङ्गरं विलसितु मिदमलमनुकूलम् ॥
सखि स किमधुना सविधमयते[4] ।
न चिरं मम हृदयं सहते ॥
॥ ध्रुवपदमिदम् ॥ २ ॥

अनुदिनमिह मयि कितवाचरणं रजनिरियं परिकलयन्ती ।
मामुपहसति कलानिधिसन्निधिमुख[5]मविकलमुपरचयन्तो ॥ २ ॥

कुसुमशरेण शरावलि[6]रखिलं मामनुमुक्ता कुसुमकुलम् ।
सम्प्रति नयनपथं यदुपेतं व्यथयति मम हृदयं विकलम् ॥ ३ ॥

ज्वलयति[7] मदनदहनमनिलाहत[8] गलितं घृतमिव मधुवहलम् ।
नृपपुरुषोत्तमगीतकलोदित हरिचरितं जनयतु कुशलम् ॥ ४ ॥

मध्येऽनिशं भजति कामविलासवापी[9]—
लीलानुगे[10] वियति यूपरुचिं सुधांशुः ।

---

1. क. 'कर' इत्युल्लेखो नास्ति ।
2. क. ख. करकलित ।
3. ख. वनमुपररुत ।
4. ग. न सविधमयते ।
5. ग. मुख ।
6. ख. कुसुमशरावलि ।
7. क. व्यथयति ।
8. ग. मनिलाहति ।
9. ख. ग. विकासवापि ।
10. क. ख. लीलानुखे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथापि किं सहचरप्रणयानुबन्ध[1]—
संखिद्यमानमनसं तदुपेक्षते माम् ॥ ८ ॥

चत्वारिंशः प्रबन्धः

(श्रीरागेण गीयते)

कुञ्जे कुञ्जे मलयमरुदुल्लोलाकुलपल्लवनिकरे
विकचकुसुमगलदविरलमधुरससेचनशोततरे ।
देशे देशे केलिकलारचनोचितविरचितकिशलयशयने
कामपि गोपवधूमभिरमयति किंवानन्दकरे ॥
निधुवनकामनया तदुपागमनधिया ।
हन्त विना दयितेन तेन मम किमिह मुधासि कया ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

भावं भावं कामपि सीदति रतिरभसादतिविजनवने
कृतविनया वानङ्गजसंज्वरपरिदूपितहृदयम् ।
भ्रामं भ्रामं शशधरमयभरनिन्हुतघनतर
तिमिर निरन्तरकुञ्जवने वा वञ्चयति प्रियगोपवधूनिचयम् ॥ २ ॥

वारं वारं मदनु[2]शरणकृतसमयबन्धमपनीय[3]
मदन्तिकमनुपुनरभिशरणं प्रति सम्प्रति लज्जितहृदयतया ।
मन्दं मन्दं सविनयमुत समुपैति मयि प्रणयादिव
किं वा तदपराधभवसन्ततचिन्तनभयभरसरलधिया ॥ ३ ॥

---

1. क. सहचरप्रणयानुबन्ध ।
2. क. मदन ।
3. ख. बद्धमपनीय ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वादं वादं प्रणयकलहसमयेदनुचितं वचनमुपागम—
महहरुषा किमुपदुपाहितया न मम सविधमयते ।
ध्यायं ध्यायं मुररिपुचरणकमलयुगलं विमलं
नरपतिना पुरुषोत्तमगजपतिना भणितं गीतं समुदयते ॥ ४ ॥

प्रसुनैर्भूयोभिः कुसुमविशिखः पञ्चविशिखो
जगत्प्राणोऽपि स्याद्विरहिहृदमन[1]कोऽपि पवनः ।
तथावस्था भेदादहह दयितोऽनिष्टचरितो
निरूपं शब्दानां स्थितिरिति न तत्स्वार्थगमिका ॥ ६ ॥

एकचत्वारिंशः प्रबन्धः

(कलहंसरागेण[2] गीयते)

कलकण्ठमधुरवाणी यदि विजृम्भते मन्दम् ।
तदिह यामि विपदम् न पदमिदमालिसुखदम् ॥
दहति तनुमपरिमाणम् । भवतु किन्नु शरणम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

मकरन्दविन्दुकुन्दम् ।
पतति मम वपुषि वहलम् । भवति हृदतिविकलम् ॥ २ ॥

विकचकुसुमाभिरामम् ।
मदनविलोकने वामम् । वनं भवति कामम् ॥ ३ ॥

नृपपुरुषोत्तमकृतम् ।
शृणुत हरिचरितपूतम् । हृदयहारिगीतम् ॥ ४ ॥

मा मुञ्च पञ्चशरपञ्चशरीं शरीरं
मा सिञ्च सान्द्रमकरन्दरसेन वायोः ।

---

1. क. मदन ।
2. ख. ग. वलहंसरागेण ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गानि तत्प्रणयभङ्गविगर्हितानि
नालम्बितुं[1] क्षणमपि क्षमतेऽद्य[2] जीवः ॥ १० ॥

द्विचत्वारिंशः प्रबन्धः

(देशाख्यरागेण गीयते)

अविरलकल्पिततरलविनिर्मलवर्तुलमुक्ताभरणमिदम् ।
मम विफलं मृदुलं हरिचन्दनलेपनमपि न वपुषि सुखदम् ॥
स.खि कथमभजं सुहृदयभेदं विदधतमेनं विगतदयम् ॥
छलकृतसमयं बलवतनयं न गणिततरुणीमरणभयम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

घनकबरीभरभरितमनोहरगर्भकमपनय रतिसुखदम् ।
मृगमदचित्रकमत्र विमोचय कुचयुगले धृतमशुभपदम् ॥ २ ॥

यामवतो ससुपैति च चरमं याममियं परिणतचन्द्रा ।
किमिह करोमि मुधा तदुपागमपरिपालनमपगततन्द्रा ॥ ३ ॥

भविकपदं विपदं यदि मन्ये किं मम सम्प्रति हरिणा वा ।
नृपपुरुषोत्तमगीतकृतेयं मुररिपुचरणकमलकृतसेवा ॥ ४ ॥

यन्नागतः ससमयं बहुधा विधाय
किं तत्र सम्प्रति मनः सखि खिद्यते मे ।
स्यादेव कैतवविदां बहुवल्लभानां
नारीजनेऽप्यभिमते[3] प्रणयः प्रमादः[4] ॥ ११ ॥

---

1. क. ग. नालम्बतु।
2. ख. क्षणतेऽद्य ।
3. क. नारीजनेऽभिमते ।
4. ख ग. प्रवादः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ कमलिनीनिद्रामुद्रां हरत्यरुणे दर—
स्फुटितकलिका[1]गर्भा विन्दो मयेन विनिह्नुतम्।
निशि किमु दिवा भीतं ध्वान्तं पुनः क्वचिदासितुं
घनमधुकरश्रेणीव्याजादमन्दमुपासरत्[2] ॥ १२ ॥

त्रिचत्वारिंशः प्रबन्धः

(सोमरागेण गीयते)

विधेवशगे निजबन्धौ मज्जति हिमरुचिसिन्धौ।
हिमलवलोलकमेषा त्यजति कुमुदिनी योषा।
विरतिमुपैति निशेयं[3] किन्नु[4] मयापि विधेयम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

मम विनिमीलनि दूनं हृदयसरोजं नूनम्।
नामतुला रिपुगण्यं[5] विकसति कमलारण्यम् ॥ २ ॥

निशे मम रतिपरितोषं दृष्ट्वा धृतगुरुरोषम्।
पश्य मुदितमिह कोकं मयि विनिहितनिजशोकम्[6] ॥ ३ ॥

तरणिमयादिव दीनं मनसि तमो मम लीनम्[7]।
नृपपुरुषोत्तमगीतं भवतु मुदे समुदितम् ॥ ४ ॥

---

1. क. कमलिका।
2. क. ग. दमन्वमपासरत्।
3 क निशेयं।
4. ख. कि न।
5. ख. रिपुरण्यं।
6. क मयिविनिदितकोकं।
7. ख. तमोमलीनम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सख्यं विनश्यतु मधोः कुसुमायुधेन
जोर्य्यन्तु तस्य विशिखाः प्रथितप्रभावाः[1] ।
प्रेमावजिह्मनसामवमानसज्ञा
लीनास्तु यन्मयि वसन्त्यसवोऽधुनापि ॥ ३ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे[2]
महाकाव्ये वासकसज्जावर्णने संक्षुब्धराधो
नाम षष्ठः सर्गः ।

1. ग. प्रभावाः ।
2. क. इति श्रीगीतगोविन्दे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सप्तमः सर्गः

विलक्षपुण्डरीकाक्षः

अथ प्रभाते सुरतान्तलक्षणं
दधानमभ्यागतमन्तिकं हरिम् ।
विलोक्य रोषारुणलोचनाम्बुजा[1]
विनिःश्वसन्ती निजगाद राधिका ॥ १ ॥

चतुश्चत्वारिंशः प्रबन्धः

(कर्णाटवङ्गालरागेण[2] गीयते)

कुसुमसायकसायकावलि पीड़िताहम् ।
तव तु दयितालोकनामृतपूतदेहम्[3] ॥
दुःसहं कलयामि चन्दनपवनसङ्गम् ।
श्वसितमरुतासार ते सुखयति तवाङ्गम् ॥
आगतोऽसि किमत्र निस्त्रपकलितमोदम् ।
सुरतसुखमनुभुय रचयसि कपटखेदम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. ग. रुषारुणलोचनाम्बुजा ।
2. ग. कर्णाटरागेण ।
3. ख. लोकनामृतदेहम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिशति कोकिलकाकलो मम कर्णतापम् ।
मणितकृत[1] मनुभवसि सम्मदमतिदुरापम् ।
लोकये हिमभानुमपि परितापकन्दम् ।
तव सुखं तनुते तवानन[2] विधुरमन्दम् ॥ २ ॥

रजनीमनयमहं विदधती बहुविलपम् ।
त्वमुपशृण्वन्मधुरतन्मुखसुप्रलापम्[3] ॥
भवदुपागमनाशयाहमुपरतनिद्रा ।
जागरेण समोपिता ते सुरतमुद्रा ॥ ३ ॥

लम्भिता भवता मयि श्रवद्दृशुधारा ।
भविता सा धृतरातश्रमवारिपूरा ॥
पुरुषोत्तमनृपतिमणितं सरसगीतम् ।
दिशतु कामं नोलगिरिपतिचरितपूतम् ॥ ४ ॥

कति न भवता वारम्वारं रते परिवञ्चिता
कितव सरज्ञाभूवं नेयं सखि भवदन्तिकम् ।
कतिमकृते यातायातैरवाप च दुःस्थितिं
तदपि न लघुकर्तुं चित्तं प्रशाम्यति मां तव ॥ २ ॥

मुरारिरपि राधायाः विप्रलापं निशम्य तम् ।
सवैलक्ष्यमिति प्रोचे विनयानुनयान्वितम् ॥ ३ ॥

---

1. ख. मणिकृत ।
2. ख. ग. तदानन ।
3. क. त्वमुपशृण्वन्मुखसुप्रलापं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चचत्वारिंशः प्रबन्धः

(नादरामकेरोरागेण गीयते)

धारयाम्यनवेद्य न धृतिं शोभनं भवदाननम् ।
कामये[1] भवदङ्गसङ्गमनङ्गज्वरमोचनम् ॥
अनपराधिनि सुमुखी मा कुरु प्रणयिनि जने ।
मयि रुषं परुषं च मा वद प्रियदर्शने ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

न हृदयं भवतों विमुञ्चति किञ्च ते किलकिञ्चितम् ।
सन्ततं मम वाञ्छति स्मर तत्र नर्मकथाञ्चितम्[2] ॥ २ ॥

मुञ्च मानिनि मानमधुना किं सुधा परिशोचसे ।
दन्तरुचिरुचिराधरं मधुरं न किं वा भाषसे ॥ ३ ॥

कलय सुन्दरि सुचरिते मयि न भ्रमं कुरु विभ्रमम् ।
पुरुषोत्तमनृपतिगोतं तं भवतु हरिहृदयङ्गमम् ॥ ४ ॥

जाने भामिनि[3] मान एष मयि ते न स्थैर्य्यमालम्बते
का वा दासजनेऽपराधगणना संजायते त्वादृशाम् ।
एषा ते परुषापि मे वितनुते सम्मोदमेवाकृतिं
यत्कोपं प्रणये विराजति परं वैरं भवेदन्यथा ॥ ४ ॥

विप्रियं बहुशः कृत्वानुनयन्तं पुरो मुहुः ।
सोपालम्भमिति प्रोचे राधिका मधुसूदनम् ॥ ५ ॥

---

1. ख. कामयेते ।
2. ख. तत्कर्मकथाञ्चितम् ।
   ग. तन्त्र नर्मकथाञ्चितम् ।
3. ख भाविनि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षट्चत्वारिंशः प्रबन्धः

(हिन्दोलरागेण गीयते)

सुरतसमरविमर्दिनि दीयतावलेपम्[1] ।
पृथुकुचयुगलघट्टनाहितघृसृणलेपम् ॥
वदति तव हृदयमन्द तदधरसीधुपानम् ।
धारयन्नयनं च तन्मदशोणिमानम् ॥
कितव मा तव चाटुवादविनोदकृत्यम् ।
भवतु दुःखिनि मयि जने पुनरिदमसत्यम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

कुसुमशरशरसञ्चयं हृदये विलोनम्[3] ।
नखरपदकपटेन पुङ्खकुलं[4] दधानम् ॥
अहमवैमि[5] विलोकयामि च निटिलभागम्[6] ।
सान्द्रसिन्दूर-मृदुलरजसा[7] रचितभागम् ॥ २ ॥

नियतमपहृतपौरुषं कलये भवन्तम् ।
कतमयापि मृगीदृशा रतिरङ्गतान्तम् ॥
अंशुकं यददादिदं परितुष्य वामा ।
सा निजं भजतेदृशं जितसुरतसोमा ॥ ३ ॥

---

1. ख. दयितावलेपम् ।
2. ख. ग. पृथुकुचाचल ।
3. ग. हृदये वलीनम् ।
4. ग. पुंखकूलम् ।
5. क. अपहमवैमि ।
6. ग. निटलभागम् ।
7. ग. मृदुरजसा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरम न कुरु परिश्रमं[1] तव हृदयभागम् ।
लोकये श्रमसलिलभरगलदङ्गरागम् ॥
पुरुषोत्तमनृपतिकृतमिति मधुरगीतम् ।
शृणुत भवभयभरं[2] हरतादुदीतम् ॥ ४ ॥

कस्त्वं तास्तु यदृच्छया कितव यास्तिष्ठन्ति गोपाङ्गनाः
प्रेमाणं न विदन्ति यास्तव बहुं किं तासु ते कैतवम् ।
एषा हन्त हताशया यदभवं त्वय्येकताना तत—
स्त्वत्तोऽयं प्रणयोऽधुना खलु मम प्राणैः समं यास्यति[3] ॥ ६ ॥

विरहावसानदूनामतिमात्रं राधिकां कृष्णः ।
निजकृतमपराधमथो[4] विनिहुवानः पुनः प्रोचे ॥ ७ ॥

सप्तचत्वारिंशः प्रबन्धः

(धनाश्रीरागेण[5] गीयते)

हृदयं जलभवकुसुमावचयं मयि वलितादरमनुयाते ।
हलककुसुमपरागसरागं क्षणमिव[6] वहति मधुपपाते ॥
मा कुरु सहचरि विधुरं चित्तं मानुभव च गुरुपरितापम् ।
कृतगिरितनयापरिचरणे मयि किन्नु मुधा रचयसि कोपम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ख. न कुरु न परिश्रमम् ।
2. ख. भवभयहरम् ।
3. क. संयास्यति ।
4. क. पथो ।
5. ख. धनासी रागेण ।
   ग. धनाशी रागेण ।
6. ख. क्षतमिव ।
   ग. क्षतमपि वा पदमपि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतियामं भवदपचिति वेधिना मम जागरणजनितरागम् ।
वहति नयन[1]मलिकं च तवाहित सिन्दूरद्युतिपरभागम् ॥ २ ॥

तदुपरचित[2]मृदुचन्दनलेपनमिदमधुना मम तनुनिहितम् ।
भवति सरमसमिहागमनश्रमनि:सृत[3]जलभरपरिधौतम् ॥ ३ ॥

गोपशिशुभिरुपनीतं मृदुलं परिशोलितमिदमपि चेलम् ।
घटयतु नृपपुरुषोत्तमगीतं हरिचरणे मतिमतिवेलम् ॥ ४ ॥

जहाति प्रेमाणं प्रसरदपि वामं न नयनं
सरागोऽपि[4] श्रीमानमृतमधरस्ते[5] जनयति ।
अतोऽलीकेऽप्यस्मिन्[6] यदि वचनीये त्यजति मे
रुषं व्यक्तं किञ्चिद्र भवतु मधुरं वक्तुमुचितम् ॥ ८॥

इत्युदीर्य्य रचितप्रणिपातं
चाटुकारमपि कैटभशत्रुम् ।
राधिकास्फुटकृतागसि तस्मि—
न्वीक्ष्य विप्रलभमानमवोचत् ॥ ९ ॥

अष्टचत्वारिंशः प्रबन्धः

(गान्धाररागेण गीयते)

तव परं गुरुमहिममोचनं न कुरु मम चरणविनिपातम् ।
मस्तकं प्रणयि सीमन्तिनी पादपल्लवरतिसङ्गपरिपूतम् ॥

---

1. ख. नलिन ।
2. ख. तदुपचरित ।
3. क. निःश्रुत
4. ग. सुरागोऽपि ।
5. ग. सुधुरस्ते ।
6. क. ततोऽलोकेऽप्यस्मिन् ।
   ग. अलोऽलीकेऽप्यस्मिन् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुञ्च बहुमानदानम् ।
मयि सुभग न पुनरुपयामि लघिमानम् ॥

॥ ध्रुवपदमिदम् ॥

जागरं स्वपनसुखभञ्जनं न कुरु लघु रचय शयनोयम् ।
निशि तया सुभगया सङ्गमं भूय एवानुभविता सि कमनीयम् ॥ २ ॥

सुरतपरिणाहकृति सूचनं तदवयवचिह्नसविशेषम् ।
न मलिनय वेशमतिसुन्दरं येन दीनममिलपसि गमयितुमशेषम्[1] ॥३ ॥

यहि परिणामशुभखण्डनं सह तया रचय न विरोधम् ।
पुरुषोत्तमनृपतिभाषितं दिशतु सततं परमानन्दबोधम् ॥ ४ ॥

यावच्चित्ते न भवति भयं निष्कृपस्त्रीवधे ते
यावत्प्राणा जहति न च मां दारुणा दुःखदग्धाः ।
जाने तावत्त्यजसि कुतुकं नात्रमाने ममेति
स्यामापन्ना यदि तदधुना पूर्णकामस्तदासि[2] ॥ १० ॥

नैराश्यविकलां राधामवलोक्य हरिस्तदा ।
प्रेमानुबन्धमधुरं सान्त्वय[3]न्निदमब्रवीत् ॥ ११ ॥

ऊनपञ्चाशत्तमः प्रबन्धः

(शुद्धवराड़ीरागेण गीयते)

तव कलयामि सकामं रूपं परमिहममिरामम् ।
कामयते मम तव तनुसङ्गं हृदपि बलितरसजलधितरङ्गम् ॥

---

1. क. गमयत्तमशेषम् ।
2 ग. स्तदासि ।
3. क. ख. ग शान्त्वया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनयसि मयि किमकारणं मानमकृतपरिमाणम् ।
विमलदृगञ्चलविनिहिततारं मुखमविलोकय मम सविकारम् ॥

॥ ध्रुवपदमिदम् ॥ ॥

विहरणलम्भितलोभं वनमवलोकय धृतशोभम् ।
विकसितकुसुमावचयविनोदं कुरु मम जनय च परमं[1] मोदम् ॥ २ ॥

शीतलविमलगम्भीरे शशिमुखि यमुनाजलपूरे ।
तपति ललाटं तपने[2] विहर[3] मया सह कोमलपवने ॥ ३ ॥

परतरुणीरतिलिङ्ग[4] न दधे ग्लपयसि कथमङ्गम् ।
नृपपुषोत्तमगीतं सततं भवतु रसिकजनहृदयानुगतम् ॥ ४ ॥

कालुष्यं पयसां चिराय हृदये धाराधरत्वं दृशो—
रम्भोदध्वनि[5]सङ्गतापरुषता[6]वाचि भ्रुवोः सुन्दरी ।
विद्युद्वल्लरीताण्डवं च तनुते लीलायितं प्रावृषो
नादत्ते शरदः प्रसादमधुना किं ते गभीराशयः[7] ॥ १२ ॥

अथ तन्निधुवन[8]चिह्नं दृशं दृशं रुपं न मुञ्चति[9] ।
विनिवर्त्तयितुं राधा जगाद मुरवैरिणं भूयः ॥ १३ ॥

---

1. ख. मरमं ।
2. क. पूरेतपने विजने ।
3. क. विरह ।
4. ग. लिङ्ग वा रङ्ग ।
5. क. दृशो ध्वनि ।
6. ग. गरूपता ।
7. क. किं ते गराशयः ।
8. क. तं निधुवन ।
9. ग. मुञ्चन्ती ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चाशत्तमः प्रबन्धः

(मल्लाररागेण गीयते)

लोकय[1] भवदनुरूपं पुनरपि तस्या रूपम् ।
नभजगतागतिपीड़ा मुदयतु न तव व्रीड़ा ॥
अपसर निर्दयकामं मयि च समाचरवामम् ।
न पुनरुपैमि निवासं तेन न याम्युपहासम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

विगलति ममतापाशे त्वयि मम हृदि च निराशे ।
सम्प्रति भवतु सकामा सा तव[2] दयिता वामा ॥ २ ॥

निरपत्रपतवलज्जा विशति किमु मयि सज्जा ।
कलयदिदं तव वृत्तं तपते यन्मम चित्तम् ॥ ३ ॥

अनुकुरुतेऽश निपातं मयि भवदीरितजातम् ।
नृपपुरुषोत्तमगीतं सुखयतु सरसमुपेतम् ॥ ४ ॥

एता मारुतविप्रकीर्णविकसद्भूयः प्रसूनान्तर—
प्रच्योतन्मधुविप्रुषो दिनमणेश्छिन्दन्ति रोचिष्क्रियाम् ।
एतस्मिन् शिशिरर्तु कर्मणि ततः स्मेराननाम्मोरुह—
स्तस्याः सम्प्रति दन्तकुन्दकलिकोद्भेदं न किं प्रेक्षसे ॥ १४ ॥

वाता वान्तु पिका नन्दन्तु मधुपा हुङ्कारमातन्वता—
मुन्मीलन्तु रसालसालमुकुलाः कामानलोद्दीपनाः ।

---

1. ख. लोकस्व ।
2. क. वत ।
3. ख. ग. रससमुपेतम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्याः सङ्गमहोत्सवेन भवतः स्वर्लोकसीमन्तिनी
सख्येनापि मम प्रियं यदधुना भूयो विधास्यन्त्वमो ॥ १५ ॥

इति प्रवृत्तैर्बहुविप्रलापै—
रुदीक्ष्य राधामकृतप्रसादाम् ।
विनिःश्वसन् दीनमनाः कथञ्चि—
दावर्त्तित[1] स्वं भवनं मुरारिः ॥ १६ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्ये खण्डितावर्णने विलक्षपुण्डरीकाक्षो
नाम सप्तमः सर्गः ।

1. क. ख. कथंचिन्मावर्त्तित ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टमः सर्गः

अकुण्ठवैकुण्ठः

अथानुनीय प्रणयप्रसाधनै—
श्चिरं वचोभिर्विमुखे हरौ गते ।
प्रबोधयन्तीमनुकूलया गिरा
मिथो वयस्यां निजगाद राधिका ॥ १ ॥

एकपञ्चाशत्तमः प्रबन्धः

(देशीरागेण गीयते)

केलिलालसमनससमुपचितमदनबाधाम् ।
हरिहरि तदनुसरणपरायणामकृतापराधाम् ॥
सहचरीमनपेक्ष्य मामपि सबहुमानम् ।
हरिहरि सममिदधे हृदयगतदयिताभिमानम् [1] ॥
विप्रियं कति तेन न कृतं मयि सकामम् ।
हरिहरि किन्तु तिष्ठति जीवितं मम तदपि वामम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

यदधियमुनाकूलमांसल[2]तिमिरपुञ्जम् ।
हरिहरि प्रणयवचसागममहं तव केलिनिकुञ्जम्[3] ॥

---

1. ख. ग. दयिताभिधानं ।
2. क. मंसल ।
3. ख. केलिकुञ्जम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यधित तत्र सुदुःसहं मम विप्रलम्भम् ।
हरिहरि काचनानुबभूव सुरतसुखोपलम्भम् ॥ २ ॥

कुञ्जधामनि तदुपगमबलिताशयाहम् ।
हरिहरि सङ्गता परिकर्मनिर्मितरुचिरदेहम् ॥
व्यरचयं रतिशयनमपगतमानलज्जा ।
हरिहरि रजनीमनयं तदनु परमिह वाससज्जा ॥ ३ ॥

आगतो दधदपरतरुणीसुरतमोदम् ।
हरिहरि ससविधं मम दर्शय न[1] प्रणयपनोदम् ॥
नीलगिरिपतिकेलिकुतुक कथाभिरामम् ।
हरिहरि पूरुषोत्तम नृपतिगीतं दिशतु कामम् ॥ ४ ॥

धन्यानामसवः प्रयान्ति[2] शिथिले प्रेम्णि प्रियस्य स्वयं
मध्या जावितमुत्सृजन्ति[3] सहसा मानेन वामभ्रुवः ।
यन्नाद्यापि जहाति जीवितमिदं मानापि मुञ्चामि त—
न्न्यक्कारं बहुधानुभूय सखि मां धिक् दारुणां तच्च धिक् ॥ २ ॥

दुस्त्यजं तमवगत्य राधिका
दुग्रहं सहचरी मुखात्ततः ।
यामुनेऽथ रहसि स्थितस्तटे
निविवेद मधुसूदनः पुनः ॥ ३ ॥

---

1. ख. दर्शयन् ।
   ग. दर्शयताशपयानोदं ।
2. ग. प्रयान्तु ।
3. ग मुत्सृजन्तु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विपञ्चाशत्तमः प्रबन्धः

(गौड़ीरागेण गीयते)

केलिकर्मणि जनितनर्मणि यन्मयानुचितं कृतम् ।
सपदि तेन तदियहृदयं रोषकोलकीलितम् ॥
सा यदा परिहाय सङ्गं मानिनी मम निर्गता ।
श्वसितुमैहत नहि तदा गुरुमाधविच्युतिदुर्गता ॥
किं मुधा परिकोपिता बत सा मया कृतबुद्धिना ।
सविनयं पुनरनुगतापि न[1] कथमनायतवेदिना[2] ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

उत्तरङ्गयितुं न यदि मयि लोचनं ध्रुतिमोचनम्[3] ।
सा यतंत तदा न धारयितुं क्षमे हृतजीवनम् ॥
लोकये यदि न हिमकरमदगञ्जनं हृदरञ्जनम्[4] ।
तन्मुखं नयने तदफले[5] स्मरविकाराञ्जनम्[6] ॥ २ ॥

धृतसुधारसनिर्भरं मधुरं पिबामि न तदधरम् ।
यदि तदापनयामि कथमेव निर्भरं स्मरसंज्वरम् ॥
पृथुकुचाचलयुगलमधुना परिरभे निविड़ं कथम् ।
येन परिपीड़यितुमीशे हृदे गतं मम मन्मथम् ॥ ३ ॥

---

1. क. न पुनरनुगतापि न ।
2. ग कथमनायति वेदिना ।
3. क. ध्रुतिमोचनमित्युल्लेखो नास्ति ।
4. क. हृदरञ्जन इत्युल्लेखो नास्ति ।
5. क. तन्मुखं नयदेफल ।
6. क. स्मरविकासञ्जनं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवतु कथमचिरेण मयि रतिरङ्गकौतुकसंकथा ।
मृगदृशो न समेति मम शममितरथा विरहव्यथा ॥
नीलगिरिपतिसम्मदं तनुतादिदं विरहोदितम् ॥
राधिकागुणचिन्तने नृपपुरुषोत्तमभाषितम् ॥ ४ ॥

वदनकमललक्ष्मीमक्षमो दातुमस्याः
निज शिरसि निधत्ते गौरवादिन्दुमीशः ।
विमलनयनकान्त्या निर्जितं कान्विगीक[1]
मृगमपि भजमानं पाणिपद्मे निधत्ते ॥ ४ ॥

अथानुनेतुं पुनरुत्कया धिया
सखीं पुरस्कृत्य जवेन माधवः ।
क्वचिन्मिथः कुञ्जवने निषेदुषो—
मुपेत्य दीनां निजगाद राधिकाम् ॥ ५ ॥

त्रिपञ्चाशत्तमः प्रबन्धः

(मलहारीरागेण[2] गीयते)

न कुरु सुधाकररुचिमददमनं वदनमुदञ्चदरुणिमपदम् ।
पदजितमपि तव धृतमुखशोभं मुदमुपगच्छति कोकनदम् ॥
परिहर रुष[3]मुररीकृततोषं प्रणयिनी पूरय मम कामम् ।
कामयसे कियदनुभावयितुं विरहं दारुणपरिणामम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. कान्विशीकम् ।
   ग. कान्दीशीकम् ।
2. क. ख. ग. मलहरी रागेण ।
3. क. रूप ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कनककुम्भरुचि हरपरभागं पीनपयोधरयुगजमिदम् ।
नयनकमलगलदञ्जनमलिनं जनयति मृन्मयकलशमिदम्[1] ॥ २ ॥

अभिनवचम्पकदामविनिन्दकमिदमवलोक्य तव सुभगम् ।
मृदितं पङ्कजभं विसमधुनाऽ[2] नुहरति[3] मृदुभुजवल्लीयुगम् ॥ ३ ॥

गलितरुचिश्रवसमुद्गक[4]लीलं[5] भूषयितु[6] कलयाभरणम् ।
नृपपुरुषोत्तमरचितं गीतं गमयतु हृदयं हरिचरणम् ॥ ४ ॥

कान्तिः काञ्चनकेतकीपरिणतिर्द्धत्ते रुचिं पाण्डरां
सन्तापेन तनुत्वमङ्गलतिका तन्वङ्गि ते नीयते ।
चित्तं व्याकुलयत्यहेतुकमिदं रोषानलोज्जृम्भितं
तारुण्यप्रियबन्धुरद्य मदनः कामं तनोतु प्रियम् ॥ ६ ॥

कान्ते रक्तोत्पलदलरुचो लोचने चारुणी ते
भ्रूकौटिल्यं स्मरनटकृतं ताण्डवं न[7] व्यनक्ति ।
रागश्चित्ते भवतु सुभगो दुर्मुखं त्वं च रम्य
वक्षोजाग्रे पुनरभिमतं तद्वयं नाननेन्द्रौ ॥ ७ ॥

---

1. ख. ग. मदं ।
2. क. मृदितं पङ्कभवं दिशतु मधुना ।
   ग. मृदितं पङ्कभवं विश मधुना ।
3. ख. नृहरति ।
4. ख ग. गलितरुचीवसमुद्गक ।
5. क. लीनं ।
6. क. भूषयन्तं ।
   ख. भूषयतं ।
7. ख. च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुःपञ्चाशत्तमः प्रबन्धः

(तोड़ीरागेण गीयते)

कुन्तलालि[1] समाकुलं वदनं नवोनमयसुन्दरम्[2] ।
पिदधता तमसेव हृदयं संवृतं मम शशधरम् ॥
भवति भवतो जीवितं परममिमतं मम दैवतम् ।
सहचरे भवदनुचरे मयि न तव मौनं तदुचितम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

चञ्चलं नयनाञ्चलं कुरु मयि विनिश्चलतारकम् ।
विकचकमलदलान्तसङ्गत[3]मधुकरभ्रमिकारकम् ॥ २ ॥

मधुरहसितरुचा परिष्कुरु सादरं मृदुलाधरम् ।
विम्बफलमिव परिणतं शशिगोचिषादरपाण्डरम् । ३ ॥

किमपि वद पिकसंघसंचितपञ्चमस्वरसुश्रवम् ।
पूरुषोत्तमनृपतिगीतं भवतु हरिचरिताश्रवम् ॥ ४ ॥

समुल्लसति मल्लिकाकुसुमतारकासंकुला
सुकेशि कवरं भरच्छलमिलत्तमो[4] वल्लरी ।
उदञ्चय मनोरमं वदनचन्द्रविम्बं द्रुतं
विकासमयतादिदं[5] तव च लोचनेन्दोवरम् ॥ ८ ॥

---

1. क. कुन्तलानि ।
2. क. नवीमयसुन्दरम् ।
   ग. नविमयसुन्दरम् ।
3. ख. दलान्तलसङ्गत ।
4. क. घनमिनोत्तमो ।
5. क. मयतामिदं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चपञ्चाशत्तमः प्रबन्धः

(नटनारायणरागेण गीतते)

विजितरतिरुचिमदमुदं भवतों निशान्तम् ।
भजति मयि मदनो विमुञ्चति बाणजातम् ॥
भवतु सदयं न तव हृदयं विप्रतीपम् ।
सुमुखि भव मम शरणमयि मयि मुञ्च कोपम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

श्वसितमरुतापहृतमिति सहजाभिरामम् ।
सौरभं मम दहति तनुमनिलोऽपि कामम् ॥ २ ॥

अङ्गहारविनिन्दिताखिला वल्लीलीला ।
भवति मयि मधुसम्पदहिताचरणशीला ॥ ३ ॥

हरिकथाकलनेन सहृदयहृदयगम्यम् ।
श्रीपुरुषोत्तम[1] नृपतिगीतं भवतु रम्यम् ॥ ४ ॥

विश्राम्यन्ति मधुद्रवाः सुमनसां वाष्पप्रवाहा न ते
प्रस्यन्दं वकुले जहात्यलिकुलं न भ्रूयुगे ताण्डवम् ।
उत्कुल्लाः करुणद्रुमा न करुणा धत्तेऽपि मय्यङ्कुरं
कालः शेषमयं मया च गमितो हा नैव मानस्त्वया ॥ ६ ॥

राधया किमपि वक्तुकामया
वेपमान नवपल्लवत्विषि ।
कम्पितेऽधरपुटे हरिस्तदा
भूय एव भणितुं प्रचक्रमे ॥ १० ॥

---

1. ख. पुरुषोत्तमपुर्वं श्रीति उल्लेखो नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कान्ते[1] कस्य ममैव नाहमितरा सा जीवितेशोऽस्मि ते
न त्वं दण्डधरः परं मम भवेदालिङ्गनं त्वत्प्रियम् ।
नेदं प्राणविपय्ययेऽभिलषितं मानं त्यज क्रीड़ितुं
यामो नैतदुपैमि कालनगरीं तत्किं विधास्ये वद ॥ ११ ॥

प्रतिवचनदानविमुखं चलितायामन्यतोऽथ राधायाम् ।
मधुमथनो निजभवनं परिभवदूनः पुनस्ततो निरगात् ॥ १२ ॥

प्रसरति निदाघसमये मानम्लानां मिथो विषीदन्तीम् ।
सन्निधिमागत्य सखी पुनरपि राधामिति प्रोचे ॥ १३ ॥

षट्पञ्चाशत्तमः प्रबन्धः

(कर्णाटरागेण[2] गीयते)

कुसुमसम विचिनोति[3] लीला रचिता किं सखि न विशाला ।
रविकरदुःसञ्चरणं विपिनं सम्प्रति दारुणभजापवनम् ॥
निर्झरहिमजलविहरणं कर्त्तुं सहचरीरमणम् ।
अनुसर गुणमणि सहजनिधानं विदितकुसुमशरतन्त्रविधानम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

तव चरणाहतिजातं न समधिगतमिव मुखजातम् ।
विगतकुसुमसमेह दानमशोकं पश्य पराञ्चितमधुकरलोकम् ॥ २ ॥

निर्भरसुरतनिदानं न कृतं सखि मधुपानम् ।
तदनुचितं रतिमन्ये मदने सम्प्रति धर्मजतापासहने ॥ ३ ॥

---

1. ख. कन्ते ।
2. ग. कर्नाटरागेण ।
3. ख. विचिति लीला ।
ग. कुसुमसम चिचितिलीला ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

येन जनितपरिभवं स्मरति जनो नहि पिकरावम्
छलितं[1] तन्न[2] भवत्या गीतं जयति नृपति पुरुषोत्तमगीतम् ॥ ४ ॥

मधुवशमधुपालीस्कारझङ्कारनाद
प्रचित शुकगिरस्ते कष्टमेवामनीता:।
सखि मधुदिवसा: किं सान्प्रतं पाटलाना—
मपि न घनविकास:[3] प्रेक्षते साभिलाषम् ॥ १४ ॥

सप्तपञ्चाशत्तमः प्रबन्धः

(भैरवरागेण[4] गीयते)

वनमिव[5] दवदहनो भयविद्रुतवनचरसत्त्वनिकायम्।
दहति[6] भृशं विधुरमयं रोषशिखी सखि तव हृदयम् ॥
रचय चरित[7]मनुकूलं मानं कलय न हृदि शूलम्[8] ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क ग छलिकं।
2. ग. तन्त्र।
3. ख. घननिवास।
4. ग. भैरवीरागेण गीयते।
5. क. वदनमिव।
6. ख. वहति।
7. क. चरति।
8. क. हृदिशूलं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खरतररविकरसङ्गवशादिव पिङ्गलपल्वलजातम् ।
व्रजति चिरं गोपमिदं तव वपुरुपरचितगुरुखेदम् ॥ २ ॥

शतमखदिग्गतपवनसमुद्गतधूलिमिरिव मृदुवल्ली ।
इयमधुना तड़िदामा धूसरिता तव तनुशोभ ॥ ३ ॥

कियदनुगतमवधीरित वयसिरमणमनुज्झितभावम् ।
दिशतु मुदं प्रणयपदं नृपपुरुषोत्तमगोतमिदम् ॥ ४ ॥

स्फुटन्ति ग्रावाणस्तपनकिरणैर्न स्फुटति वा
कथं चित्तं तस्य ज्वलति विरहाग्नौ तु मृदुलम् ।
वराहार्णा पङ्के प्रविशति कुलं घर्मविधुरं
न पङ्कं काश्मीरं स्पृशति च हरिः संज्वरभयात् ॥ १५ ॥

दार्वाघाटनिकुट्टनेन सदृशी नीता मदभ्यर्थना
वैयर्थ्यं गणिताः[1] न ताः प्रणयिनश्चाटूक्तयः सन्तताः ।
स्वीयं च वसनं[2] त्वया सखि न चेत्संभाव्यते दुःसहं
प्राणेभ्यः शतशः शपे यदि रुषं न त्वं प्रिये मुञ्चसि ॥ १६ ॥

---

1. क. गमिता ।
2. ख. ग. व्यसनं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टिमङ्गिगमितप्रसादया
स्निग्धया मृगदृशाथ मुग्धया ।
किञ्चिदुल्लसितगण्डमण्डला
राधिकासहचरीं निरैक्षत ॥ १७ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्ये मानिनीवर्णनेऽकुण्ठवैकुण्ठो[1]
नामाष्टमः सर्गः ।

1. ग वर्णने सोत्कण्ठवैकुण्ठो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवमः सर्गः

अनुकूलराधः

हुंकृतैर्मधुलिहामथ स्मरे
मालतीकुसुमबाणमुञ्झति ।
राधिकां पुंनरुपेत्य सा सखी
वाचमित्यवि थामुदैरत ॥ १ ॥

उद्यत्फुल्लकदम्बडम्बरसटाटोपस्फुटत्कन्दली
पुच्छः केतकपुष्पतोदृण[1] नखरः कुन्दप्रसूनः श्रुतिः ।
जातिकुट्मल[2]दन्तसन्ततिरयं पश्चास्य लीलायितं
धत्ते सम्प्रति पान्थमत्तकरिणो हन्तुं पयोदागमः ॥ २ ॥

अष्टपञ्चाशत्तमः प्रबन्धः

(वङ्गालरागेण[3] गीयते)

प्रियसमागमपथविलोकनवलितचित्ता ।
देहलीमनुसृत्य सततं सन्निवृत्ता ॥
सपदि दिशि दिशि श्रृण्वती कलकेलिनादम् ।
श्रुतियुगं पिदधाति विकला कलितखेदम् ॥

---

1. क. केतकीतीक्ष्णपुष्प ।
2. क. कुड्मल ।
3. ख. ग. वङ्गालवराड़ीरागेण ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निधनमपि सखि नैवमनुते दुर्विधानम्[1] ।
पथिकतरुणी किमुत गणयति सुखनिदानम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

विरमति क्वचिदपि हिमसमये वारिधारा ।
सन्ततं सा भवति परिगलदश्रुपूरा ।
शङ्कते दयिते कमपि गुरुमन्तरायम्
भारमिव विरहेण वहति स्वीयकायम् ॥ २ ॥

विमति[2]पदमिति न परिकलयति रत्नभूषा ।
लम्बमानालकमुखी धृतकरुठशोषा[3] ।
दयितगुणगणनया कृतवदनमुद्रा
रजनीमतिवाहयति चिन्ताविरतनिद्रा ॥ ३ ॥

नभसि विलसति नदति वर्षति[4] मेघजाले ।
भ्रमति रोदिति सा प मुह्यति वत कराले ॥
नीलगिरिपतिरचितचिन्तनयाभिरामम्
पुरुषोत्तमनृप तगीतं जनयति कामम् ॥ ४ ॥

पङ्कविलेऽवनितले बहुतां गतानि
तूर्णं जलानि कमलानि निमज्जयन्ति ।
यच्छ्रीमतामपि जलाशयसंश्रितानां
प्रायो मिलन्ति विपदः सहसा जनानाम्[5] ॥ ३ ॥

---

1. क. तदुर्विधानम् ।
2. क विमिति ।
   ग. विरमति ।
3. शोषा = शोषणेन कामवाणेन शुष्यते इति शुष् घञ् आच् ।
4. ख. कर्षति ।
5. ख. जलानां ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जातीमभिनवकुसुमावलि[1]तरुणे साभिलाषमनुयाते ।
शोचति मल्लीवल्लीप्रोषितदयितेव विच्छाया[2] ॥ ४ ॥

एकोनषष्टितमः प्रबन्धः

(मुखारीरागेण गीयते)

अर्द्धतनुमयवामनयनं विषमनयनं शासनम् ।
व्यधित यस्य मनोभुवं प्रति तमपि विजयिशरासनम् ॥
यत्र सहचरभावमयते नवघनाघनमण्डनम् ।
प्रकटयन् धनुरमरपतिरमर रिमण्डलखण्डनम् ॥
इह हि मन्मथमुद्वहदि समये विन्दति प्रियसङ्गमम् ।
कामिनीकृतमुचरिता सखि जनितनिर्भरविभ्रमम् ॥

॥ ध्रुवपदमिदम् ॥

सजलकणहिमपवनकृतजड़मानसुरसिरुहोष्मणा ।
कामनोपनयन्ति सदृशा मशिथिलाहितवर्ष्मणा ॥
मदकले जलकूलनीड़ग[3]कालकण्टककूजिते ।
रहसि हृदयं मणितमभ्यसितुं नवोढ़ानि दधते ॥ २ ॥

नभसि जलदारम्भसम्भूति वहलतिमिराड़म्बरे ।
रमणभवनाभिमुखवाहिनो पथि विलोकनभीकरे ॥
मुहुरुदञ्चितचञ्चलारुचिदीपदर्शितवर्त्मना ।
मृगदृशामपनोयते मय मतनुशम्बरधातिना ॥ ३ ॥

---

1. ख. ग. कुसुमामलि ।
2. ख. प्रोषितदयितेदिविच्छाया ।
3. क. जकूलनीड़प ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्पुरातपतापरुजया[1] निर्भरं न कृतं रतम् ।
प्रगुणमधुना मन्मथेन तदविरतं किमु सञ्चितम् ॥
हरिकथामनुचिन्तितुं[2] यदि भवति हृदयं सादरम् ।
पुरुषोत्तमनृपतिगीतं शृणु तदा रसबन्धुरम् ॥ ४ ॥

उद्गर्जितेन पटहानिव वादयन्ति
मेघाः किरन्ति[3] करकाकपटेन लाजाः ।
हर्षात्पठन्ति[4] जयघोषमिवातिमात्रं[5]
क्रौञ्च द्विजा विजयिनि स्मरभूमिपाले ॥ ५ ॥

प्रणयिनि विलम्बमाने प्रतिभयशङ्काधिशङ्कुमिन्नहृदयः[6] ।
प्रोषितपथिका अस्मिन विहितसपर्या स्तुवन्ति गिरितनयाम् ॥ ६ ॥

षष्टितमः प्रबन्धः

(आम्रपञ्चमरागेण[7] गीयते)

शूलविदलितमहिषदितिसुतहृदयभागे ।
निहतशतमुखकीर्त्तिहिमकिरणोपरागे ॥
कलितशवरीरूपवलयित[8]शेषनागे ।
गिरिशजीवनवितरणप्रथितानुरागे ॥
सहजभावविनीर्णनिजतनुभागवर्गे ।
कुरु मनोरथमवितथं लघु देवि दुर्गे ॥ १ ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ख. तापरजया ।
2. ख. मनुरन्तितुं ।
   ग. मनुचिन्तित° ।
3. क. कियन्ति ।
4. क. वर्षाः पठन्ति ।
5. ख. जयघोषमिमेतिमात्र° ।
6. ख. हृदः ।
7. क. ख, ग. अपरपञ्चरागेण ।
8. ग. कलयति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अरुणवृत्तिविलोचनान्तरतरलतारे ।
गगनतलपरिकीर्णपिङ्गलचिकुरभारे ॥
प्रेतजम्बुकवृकवधूगणसपरिवारे ।
चण्डिके नरमुण्डमण्डलरचितहारे ॥ २ ॥

सततचिन्तनयोगसहजसमुदितभाने ।
त्रिगुणमयतनुकल्पिताखिलभवविधाने ॥
विविधरूप[1]परिग्रहक्षतभयविज्ञाने ।
कालरजनी यथासमयजतिावसाने ॥ ३ ॥

भुजगपतितनुशयितमुररिपुयोगनिद्रे ।
विनतजनकृतकामनामरवल्ली मद्रे ॥
देहि मतिमिह कथितमाधवकेलिमुद्रे ।
पुरुषोत्तमनृपतिगीते भावमन्द्रे ॥ ४ ॥

धारापातैरुपवनभुवो मर्मरारावघोरैः
प्रभ्रश्यद्भिर्गिरिपरिसरानिर्झरौघैर्भृगुभ्यः ।
पान्थस्त्रीणामिह जनपदामुक्तकण्ठैर्विलापैः
सम्पद्यन्ते सतत मुखरा रुद्धकर्णान्तरालाः ॥ ७ ॥

एकषष्टितमः प्रबन्धः

(सालंकनाटरागेण[2] गीयते)

पथिकजनहृदयानि तमसा विरहविक्लवमासते ।
येन तानि विवेकदीपजबोधमणुमपि विदधते ॥
तदिह सहचरी नियति-वञ्चित-चेतसो न मुधासितुम् ।
समुचितं तव लघुपदं दयितं तममिसरविलसितुम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. विविधिरूप ।
   ख. विधिरूप ।
2. क. ख. ग. सालगनाटरागेण ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रेयसोकुलव[1]दनमलिनं वीक्ष्य जम्बूफलभरम् ।
कुररुतमनुकुर्वते शुचमेत्य पथिका निर्भरम् ॥ २ ॥

उन्द्रगोपकुलं विराजति हलविदलिते भूतले ।
निहित[2]मस्त्रं दहनमिव मदने न विरहिजनेऽखिले ॥ ३ ॥

यादसामुलमेधते कुलमध्वनीनजनाधिना ।
कृतमिदं नवगीतमुदयति पूरुपोत्तमनृपतिना ॥ ४ ॥

क्षामप्रकोष्ठविगलद्वलयप्रपात
भीत्या वियोगिवनिताः करपल्लवेन ।
ताटङ्कमाशु दधति स्खलितं श्रुतिभ्यां
स्वश्रेयसे प्रियतमस्य गतस्य दूरम् ॥ ८ ॥

द्विपष्टितमः प्रबन्धः

(गुर्जरीरागेण गीयते)

नृपसमयाकुलभूरुहसंमिलदविरलनवदलमालम् ।
विपिनतललोकनरमणीचिन्तन शोचनपथिकविमोहकरम् ॥
दयितसमागमसमयविनिर्गम शोचमोनतरुणीपृथुसम्भ्रम—
रचितशकुलशतवोधपरिश्रम दुःखविधानपरम् ॥
पश्य जलदसमयं सहचरि जनितभयम् ।
अभिसर दयिततमं प्रति सम्प्रति भवदनुगतहृदयम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. ख. ग. कुच ।
2. क. विनिहित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कापि विनिन्दति नियतं नन्दति
न सहचरीकुतुकेषु न विन्दति
धृतिमरविन्दति चिन्तासन्ततिं सरिति पथिकसुमुखी ।
त्वमपि मदनवनपालसमुपचित[1]
सहजरागभरदोहदसञ्चित
यौवनतरुफलभोगे सम्प्रति वससि किमिह विमुखी ॥ २ ॥

गगनतलाजिरविहरदम्बुधर
सम्भरलक्ष्मीचलवसनाञ्चल—
रुचिसममाशुगविजयपताका वल्लीरुचं विमला ।
समदबलाकावलिमनुकुरुता—
दयमधुना तव कुचयुगानहिता
हारलता रतेसङ्गरसन्ततपौरुषकृतिलोला ॥ ३ ॥

मणितगुरौ तव कुक्कुभपक्षिणि
नदति[2] कुलं सुरतश्रमहारिणि[3]
किरति जलं पवने रतिभवने विलस रहसि सुभगे ।
रसवलितं ललितं पुरुषोत्तम—
गजपतिना विरचितमिति गीतं
दिशतु विनिर्मलसज्जनहृदयं मुररिपुचरणयुगे ॥ ४ ॥

लीयन्ते सहजारयोऽपि मिलिता भूमेभृतां कन्दरे
क्लिन्नाङ्गा हिममारुतव्यतिकरव्याकम्पिनो जन्तवः ।
विद्युद्वल्लीतरङ्गितक्षणभिया गाढं निरुध्य श्रुती
गर्जत्यम्बुधरे च गर्भभवनं धावन्ति पान्थस्त्रियः ॥ ६ ॥

---

1. ख समुचित ।
2. क. नन्दन्ति ।
3. क वारिणि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतितन्त्रनियामकप्रयोगे
नवतारुण्यमवाप्य कर्णधारम् ।
तरणौ तरुणीमधिश्रयन्त—
स्तरुणाः कामपयोधिमुत्तरन्ति ॥ १० ॥

करकापुष्पविशिखानुल्लास्य सुमनो धनुः ।
वर्षत्यम्बुदकन्दर्पे राधिकामिदधे सखीम् ॥ ११ ॥

त्रिषष्टितमः प्रबन्धः

(ककुभरागेण[1] गीयते)

बहलपरागसमूहकराले मदनकृताखेटककाले ।
केलिकलाकलिता किं न मया मधुदिवसे हत वेधिवशाया ॥
न चटुलचाटुरतं[2] यमपश्यं न तमपि विनतासुतकेतुम् ॥
सम्प्रति कथमुपयामि च सविधं तस्य वदामि किमनुनेतुम् ॥

॥ ध्रुवपदमिदम् ॥ १ ॥

प्रियकरकृतमृदुमृगमदलेपं न किमिति धारागृहवासम्[3] ।
व्यरचयमनयं परमद्युतिखर[4] रुचितप्ता शुचिमासम्[5] ॥ २ ॥

कुसुमशरो रमयितुमिह मुञ्चति निजकेतनमपिमपरौघम् ।
कथमधुना निवसामि विना तं दयितं क्षणमपि सखि मोघम् ॥ ३ ॥

---

1. ग. ककुभरागेण ।
2. क. चटुचाटुरतं ।
3. क. राधागृहवासम् ।
4. क ग परमद्रिमद्युतिखर ।
5. ग. शुचिवासं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इह हि यथा रमणेन न रमितं वञ्चितहृदया सा विधिना ।
इदमुपरचितं[1] सुखयतु गीतं पुरुषोत्तमनृपगजपतिना ॥ ४ ॥

एतर्हि केतक शंखा[2]करपत्रभिन्ने
विच्छेदिनि हृदयदारुणि वामनेत्राः ।
कान्तप्रणीतमदनोत्सवकर्मरम्ये
हर्म्योदरे रतिकथाः कलयन्ति धन्याः ॥ १२ ॥

चतुःषष्टितमः प्रबन्धः

(रेवगुप्तिरागेण[3] गीयते)

भजमानामृदुपदपङ्कजसम्बाहनविधिना ।
अनुकूलं विदधे दयितं तमुपयातमधुना ॥
न कुरु चिरं प्रणयपरं सखि सरभसमनुनयकान्तम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

अभिसरणे निशि पथि लग्नं चरणनवकिशलये ।
अङ्कगते पङ्कवहलं वसनेनापनये ॥ २ ॥

अभिधातुं पुनरनुचितमिति सशपथपदपातम् ।
रचयेऽयं तदनुवदामि च मधुरवचनजातम् ॥ ३ ॥

अनुपगते[4] प्रणयिनि न धृतिं क्षणमपि हृदि कलये ।
भवतु चिरं नृपपुरुषोत्तमगीतं शुभमतये ॥ ४ ॥

---

1. क. इदमुपचरितम् ।
2. क. केतकीमशि ।
3. क ख. ग रेहगुप्तिरागेण ।
4. ख. अनुपमिते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आनन्दयामि नयने परिमार्जयामि
तापं मनोरथशतं सखि पूरयामि ।
निर्वापयामि हृदयं सफलीकरोमि
जन्माद्य केलिभवने दयितं प्रपन्ना ।। १३ ।।

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्ये प्रोषितभर्तृकावर्णनेऽनुकूलराधो
नाम नवमः सर्गः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दशमः सर्गः

सानन्दमुकुन्दः

अथ मदनतापदूनं विप्रियमनुशोच्य मुक्तजनसङ्गम् ।
निजगाद सा वयस्या मधुसूदनमेत्य राधिकानुनयम् ॥ १ ॥

प्रमोदमानेन मुरारिणा ततः प्रसूनवाटीभवनान्तरे मिथः ।
विधाय रन्तुं समयं विसृज्य तां सखीमुपस्थीयत तत्र रंहसा ॥ २ ॥

अन्तः प्रमोदमसृणो लसदीक्षणान्ता—
मुत्फुल्लगण्डफलकामवनम्रवक्त्राम् ।
राधां मुरारिरवलोक्य सखी जनेन
सङ्केतवेश्म तदुपागमितां जगाद ॥ ३ ॥

पञ्चषष्टितमः प्रबन्धः

(सोमवराड़ीरागेण[1] गीयते)

वदनमुन्नमयाधुना दरचारुहासम् ।
दुर्दिने हततिमिरमिव विधुं[2]मुदितमासम् ॥
प्रविश सुन्दरि केलिमन्दिरमिदमुदारम् ।
पूरयेह मनोरथं मम सुकृतसारम्[3] ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. ख. ग. सामवराड़ीरागेण ।
2. ख. वधू ।
3 क. सुतसारम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोकनामृतधारया मम सिञ्च देहम् ।
सततमुपचितविरहहुतवहकलितदाहम् ॥ २ ॥

किमपि निगद विपञ्चिका मृदुभावगम्यम् ।
मदनकुण्डलेगरलखण्डनमन्त्ररम्यम् ॥ ३ ॥

हरिकथा परिशीलनाय निदधत चित्तम् ।
पुरुषोत्तमनृपतिगीते विमलवृत्तम् ॥ ४ ॥

काश्मीरं मणिमुज्ज्वलघनमसी[1] छायेव ते निर्मलं
कालुष्यं हृदयं निनाय सुभगे मानस्तदा दारुणः ।
युक्तं सम्प्रति न प्रसीद सुहृदो मौनं तव क्रीडितुं
सोऽयं काममहोत्सवस्य समयः प्राप्तः प्रियं भावुकः ॥ ४ ॥

षट्षष्टितमः प्रबन्धः

(कर्णाटरागेण गीयते)

मृदुलकिशलयकोमलं तव लालयामि सुलोचने ।
तदधुना विनधेहि शयने चरणमिह रतिरोचने ॥
रचय न चिरमुपैहि भाविनि मदनबाधामोचने ।
भवतु मा तव लज्जितं मयि विरहजज्वरशोचने ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

करतलेन मृजामि वदनं श्रमजलस्नपिता[2]लकम् ।
कमलमिव परिलीनभृङ्गं मञ्जुलालकमालिकम् ॥ २ ॥

---

1. क. घनसी ।
2. क. स्नपितालकम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुमुखि संयमयामि विश्लथबन्धनं कवरीभरम् ।
सुमनसा तव कुसुमसायकविशिखकोषसहोदरम् ॥ ३ ॥

दर्पणाकृतिमदनफलके तिलकमलके संदधे ।
पुरुषोत्तमनृपतिगीतं शृणुत मुरारिपुसम्मदे ॥ ४ ॥

निधाय त्वामग्रे निजविजयशक्तिं मम वपुः
शरव्यं कुर्वाणो शशिमुखि रुषा पुष्पधनुषि ।
अपाधारासारा[1] विषम विशिखीयन्ति परितोऽ—
धुना विस्फुर्जन्ती मयि च दहनास्त्रायति तड़ित् ॥ ५ ॥

लज्जया गमनमन्थरक्रियां
सन्निधिं प्रति तदा मुरद्विषः ।
राधिकां सहचरी निरीक्ष्य सा
वाचमेतदुचितां समभ्यधात् ॥ ६ ॥

सप्तषष्टितमः प्रबन्धः

(कुन्तलवराटेन[2] गीयते)

न यदुपलम्भमृते बहुमनुते वल्लवतरुणीनिकुरम्बम्[3] ।
जीवितमपि तव सोऽयं सविधे वसति मुधा कुरु न विलम्बम्[4] ॥
अनुसर केलिकलाहितमनसं तमनुगतं निजदयिततमम् ।
क्षणमपि येन विना तव भजते विरहि शिखां सखि न परिशमम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. अपाराधासारा ।
2. ग. कुञ्जरीरागेण ।
3. क. ख. निकुरुम्बम् ।
4. क. 'अनुसरकेलि—दयिततम'मित्यत्र (२) गीतसंख्यालिखितास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवतरुणिमरुचिमनुपमरूपं प्रणयमपि प्रियहृदयकृतम् ।
यदभिलषत्यबलाकुलमधुना तदिदमिह त्वयि समुपगम्[1] ॥ २ ॥

उन्मदवर्हिणनटनविलोकनमुदितकुसुमशरनृपतिरयम् ।
ऋतुरखिलकलानिधिरपि रमणो विफलं किं कुरुषे समयम् ॥ ३ ॥

रमणं समुचितं विजनं भवनं किमपरमधुना कामयसे ।
प्रविशतु हृदयं हरिचरितोदितनृपपुरुषोत्तमगीतरसे ॥ ४ ॥

एतस्मै यदकृत्रिमप्रणयिने प्राणेश्वराय त्वया
यद्वा तुभ्यमनेन[2] यच्च भवतोः प्रीत्यै मया चेष्टितम् ।
एतद्वः फलवत्तया परिणतं तत्साम्प्रतं जायतां
पुष्पेषुः फलितश्रमश्च युवयोः सिद्ध्यन्तु केलिकथाः ॥ ७ ॥

सख्यामथाभिमुख्यं[3] विनिर्गतायां विधाय राधायाः ।
मधुमथनसन्निधाने सहजभावा वमूवुरेतस्याः ॥ ८ ॥

अष्टषष्टितमः प्रबन्धः

(मध्यमादरागेण गीयते)

सुरतविलम्बमासेवितुं स्तनितवचनेन घनवृन्दे ।
बोधयति मरुति मदनानलं दीपयति नीपपरिमलवहनमन्दे ॥
राधिकावलितकामा ।
मन्दं मन्दं शयनमभजदभिरामा ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. क्षणमपि—समुपगतमित्यन्तमुल्लेखो नास्ति ।
2. ख. मनेक ।
3. ख भिसख्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फुटकुसुमदामपिहितोदरे वहलपरिमलदगुरुधूपे ।
मृदुलघनसाररजसा चित्रे भवति भवने विशद वेमलमणिदीपे ॥ २ ॥

कालकण्ठकविरुत[1] संकुले केकिकूले[2] कलितकलनादे ।
सावधिविनेहितकुसुमगर्भके मधुमुदितमधुपकुलझङ्कारवादे ॥ ३ ॥

लम्बया विविधमणिमालया विमलया चारुणि विताने ।
पुरुषोत्तमनृप तेकृतिरियं विशतु हृदि हरिचरितमनुवर्त्तमाने ॥ ४ ॥

पाणिभ्यां कपटेन बद्धकवरीभारं पुनर्बध्नतो—
मीषद्व्यञ्जितपीवरस्तनतटीं विस्पष्टनाभीह्रदाम्[3] ॥
मन्दस्मेरमुखीं विधूनवसन[4]प्रव्यक्तवृत्तोरुकां
राधामङ्कमथानयत्प्रियगिरा संप्रीणयन्माधवः ॥ ६ ॥

राधिकांशुकमपत्रपयेव संस्रते स्म सपदि श्लथनीविः ।
अन्यमन्यत तदा न निरोद्धुं सापि तन्निधुवनप्रतिकूलम् ॥ १० ॥

एकोनसप्ततितमः प्रबन्धः

(वेलावलीरागेण गीयते)

निविड़कुचपरिपीड़मविरलपुलकिना विपुलोरसा ।
राधिका परिषस्वजे हरिणा तयापि सरंहसा ॥
प्रसरति स्मरसङ्गरे गुरुतरुणिमहितमत्सरम् ।
अङ्गमङ्गं सङ्गमयते तदुभयोरपि निर्भरम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. कालकविरुते ।
2. क. केलिकुले ।
   ख. ग. केलिकुले ।
3. क. ह्रदा ।
4. क. विधुनदवन ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनिदधे मृदुदशनपदमधि राधिका मधुराधरम्।
हरिरचुम्बदियं च वल्लभदशनवसनं सादरम् ॥ २ ॥

राधिकाकुचमण्डलं परिमण्डितं नखरेखया।
मुरजितानमितं करेण च रमणमस्तकमेतया ॥ ३ ॥

तावुभावितरेतरं च्छुरितानि चक्रतुरङ्गके।
पुरुषोत्तमनृपतिगीतं दधतु मतिमतिनन्दके ॥ ४ ॥

तुमुले रतिसङ्गरे प्रवृत्ते
सुहृशोऽस्याः प्रययौ भियेव लज्जा।
ववृधे च सहायतां विधातुं
मदनस्तत्र तयोरमोघधन्यः ॥ ११ ॥

राधिकाथ मणितानि[1] कुर्वती
माधवस्य तनुते स्म सम्मदम्।
मर्दयन् स च कुचोरुयुग्मकं
तन्मुदं सुरतकर्मकर्मठः ॥ १२ ॥

सप्ततमः प्रबन्धः

(शुद्धवङ्गालरागेण गीयते)

मृदुनि शयने पुलकमुकुलितं राधिका विनिदधे देहम्।
तदुरसि च समगमयदङ्गकं मुरजिदुपरचितरतिबन्धपरिणाहम्।
तदुभयोरपि निमग्नम्।
हृदयमधि रसजलधिगुरुभावलग्नम् ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. राधिकामणितानि।
ख. राधिकाथ मणितानि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभवदलमलक्तकपदाङ्कितं मृगदृशो रमणगलनालम् ।
चलचरणयुगलतलमम्बरे स्थलकमलमिव विकचमुपरचितखेलम् ॥ २ ॥

शयनमधिशयितवति वल्लभे पौरुषं चरितमपि राधा ।
कर्त्तुमारभत गुरुसाहसा न विगणितनिजमृदुलतनुवल्लीबाधा ॥ ३ ॥

स्तिमितदरमुकुलितविलोचना सीत्कृतं समतनुत राधा ।
पुरुषोत्तमनृपतिकृतिरियं जयति हृदि जनितपरमानन्दबोधा ॥ ४ ॥

इति विरचितबन्धैः प्रीणयन् प्रेयसीं तां
मुररिपुरपि लेभे सान्द्रमानन्दबोधम् ॥
शिथिलितभुजवल्ली वेपमाना श्वसन्ती
रमणतनुममुञ्चन्निःसहाङ्गी च राधा[1] ॥ १३ ॥

स्वेच्छयापगमसंगमितागः—
स्तन्निचोलमवधीर्य्य रुषेव ।
तावुभौ प्रमुदितौ जगृहाते
सद्य एव मृदुलांशुकमन्यत् ॥ १४ ॥

एकसप्ततितमः प्रबन्धः

(भिन्नषडजरागेण गीयते)

संयमयामि सुकेशि मनोरमविगलितकबरीभारम् ।
प्रणयमहीरुहफलमिव विदधे चन्दनतिलकमुदारम् ॥
हरिरिति[2] वलितादरम् ।
राधामथ निजगाद समधुरम् ।
॥ ध्रुवपदमिदम् ॥ १ ॥

---

1. क. श्लोकस्यास्य उल्लेखो नास्ति ।
2. ख. ग. हरिरिति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुटिलविलोकिनि नयने चपले मलिनं तव घटयेयम् ।
अञ्जनमुरसिरुहे मकरध्वजकेतनमपि रचयेयम् ॥ २ ॥

भुजगवल्लीदलमिदमुररो कुरु रुचिरं सहजसरागम् ।
अधरविम्बमधुना तव सुन्दरी विदधे सन्ततरागम् ॥ ३ ॥

आभरणानि यथापदमिह तव निदधे वपुषि निकामम् ।
नृपपुरुषोत्तमगीतं सुभगं भावयतु प्रियकामम् ॥ ४ ॥

इति विरचितवेशां माधवस्तत्र राधां
कृतदृढ़परिरम्भं प्रीणयंश्चाटुवादैः ।
स्वसविधमुपगन्तुं सङ्गसौख्याय भूयः
सशपथमनुनाथ्य[1] प्राहिणोत्तां कदाचित् ॥ १५ ॥

द्विसप्ततितमः प्रबन्धः

(मङ्गलगुज्जरीरागेण गीयते)

उद्धृतानगमनिकायं[2] धृतमीनाकृतिकायम् ।
कच्छपवपुषमुदारं धरणीधरणगुरुसारम् ॥
निपतन्निह संसारे कल्मषमलिनाचारे ॥
नौमि भवन्तमपारे[3] जयजय देव मुरारे ॥
॥ ध्रुवपदमिदम् ॥ १ ॥

दशनशिखरधृतगोत्र क्रोलमुदञ्चितपोत्रम् ॥
नरहरितनुमतिचित्रं नखरदलितादितिपुत्रम् ॥ २ ॥

---

1. क. ननुमाथी ।
2. क. उद्धृतनिकायशमतिकायं ।
3. क. भगवन्तमपारे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूसुर[1]मद्भुतखर्व्वं छलपरिहृतबलिगर्वम् ।
विरचितकुवलयदानं भृगुपतितनुमसमानम् ॥ ३ ॥

आराधितशितिकण्ठं रामं हतदशकण्ठम् ।
मधुरसुररसमन्तं हलधरमुद्गतवृत्तम् ॥ ४ ॥

करधृतमन्दरशैलं नन्दगोपवरबालम् ।
करसमुदितकरबालं कल्किनमरिकुलकालम् ॥ ५ ॥

दशविधभवदवतारं भवजभयादवितारम्[2] ।
नृपपुरुषोत्तमगीतं सुखयतु सज्जनचित्तम् ॥ ६ ॥

नित्यानन्दचिदात्मकायसहजप्रद्योतमानत्विषे
हृत्पद्मान्तरवासिनेऽखिलजगत्सृष्टिक्रियाहेतवे ।
विश्वत्राणपरायणाय समये तस्यैव संहारिणे
मायाकल्पितमूर्त्तये भगवते देवाय तुभ्यं नमः ॥ १६ ॥

इति श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनवगीतगोविन्दे
महाकाव्ये स्वाधीनभर्त्तृकावर्णने सानन्दमुकुन्दो[3]
नाम दशमः सर्गः ।

समाप्तोऽयं ग्रन्थः

---

1. क. भूसुत ।
2. ख. ग. भवजयादवितारम् ।
3. क. नन्दमुकुन्दो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथमपरिशिष्टम्

'क' ग्रन्थपुष्पिका

सकलदेवाधिदेवश्रीमज्जगन्नाथप्रियतनय — सततपरिपालनविध्वस्तविविध—प्रत्यूहनिरपायाकृत-श्रीदुर्गापुत्र-निरन्तरनारायणचरणसरसिजमकरन्दपानलम्पट[1] चञ्चरीक चित्तवृत्ति — श्रीधरापरिरक्षितप्रमदभरभरितमानस—श्रीनृसिंहभक्तिविशेष—समासादित साम्राज्य[2] — लक्ष्मीविभावितमहामहिमसन्ततवेदान्त[3]निगमवासनावासितनिर्मलान्तः-करण-गजपति-गौड़ेश्वर-प्रभञ्जकलवरग[4] वज्रजलधिमन्थमन्थाचल-निजभुजवीर्य्योपार्जित विपक्षराजपक्षकालिमेति[5] विरुदपदविराजमान-कलवर्गेश्वर वीरवर-वीरकेदार-चन्दीकरण-मोचनसमयसमर्पितकर्णाटराज्य[6] प्राचीनमहाराजचक्रसमुपार्जितमहार्घपेण्डाम नाम मणिपाटकजनितसन्तोषपरिणत-नवकोटि—कर्णाट[7] महीपति-नवकोटिकर्णाटाधीश-यशः[8] समासादित-कट्टारिशालिनिति तदीय-विरुदपद नवकोटि-कर्णाटेश्वर[9] स्वचक्रभिन्न-निजदुर्विनयामात्य-दुष्टचेष्टालुतातन्तुसन्तानविशकलनप्रचण्डचण्डकर-सूर्य्यवंशकमलविकाश भास्कर-परममाहेश्वर — परमवैष्णव-परममट्टारक-रिपुराजतोड़रमल्लविषमसमर-निःशङ्क-महाराजाधिराज श्रीपुरुषोत्तमदेव गजपतेरस्यैव वर्द्धमानविजयराज्ये चतुस्त्रिंशदंके वैशाख शुक्लप्रतिपदि भानुवासरे समाप्तमिदं पुस्तकम्।

उपपुष्पिका

श्रीराधाकृष्णचरणे शरणं भव।
भीमस्यापिरणे भङ्गो मुनेरपि मतिभ्रमः।
यदि शुद्धमशुद्धं वा ममदोषो न विद्यते॥

---

1. क. मकरन्दपालम्पट।
2. क. समादि साम्राज्य।
3. क. सन्ततवेदनान्त।
4. क. कलयर्ग।
5. क पक्षिशालिमेति।
6. क. कन्नाटराज्य।
7. क. कन्नाट।
8. क. कन्नाटाधीशयशः।
9. क. कन्नाटेश्वर।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री मद्रामचन्द्रजगद्गुरो त्राहि माम् ।
पुस्तकं हरते यस्तु काणो दुःखी भवेन्नरः ।
मृतः स्वर्गं न गच्छेत्स पितरं नरकं नयेत् ।
श्रीधरशर्मणा लिखितमिदं पुस्तकम् । लेखके नास्तिदोषः ।

'ख' ग्रन्थपुष्पिका

नमामि ते कृष्णपदारविन्दं प्रपन्नतापोपशमातपत्रम् ।
यन्मूलके ते ऋषयोऽञ्जसोरुं संसारदुःखं बहिरुत्क्षिपन्ति ॥
श्रीगोपीनाथः शरणम् । श्रीकृष्णः शरणं ममास्तु सततं श्रीराधिकावल्लभः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीयपरिशिष्टम्

ग्रन्थान्तर्गतकतिपयरागलक्षणध्यानानि

१—आम्रपञ्चमरागलक्षणम्--

आन्ध्रो जातिसमुत्पन्ना मध्यमग्रामगोचरः ।
गान्धारांशग्रहन्यासः रागः स्यादाम्रपञ्चमः ।
निनादः किम्प्रबहुलः करुणाद्भुतहास्यगः ॥[1]

(ध्यानम्)

युवातसीसूनसमानकान्तिः श्रीखण्डपङ्कार्द्रसमस्तदेहः ।
वीणाप्रवीणोऽमरपञ्चमोऽयं गीतेन मुग्धीकृतदेवराजः ॥[2]

२—आभिरीरागलक्षणम्

धान्ताभिरी धैवतजा रि—हीना च शुचौ प्रगे ।[3]

(ध्यानम्)

वाचालकङ्कणविभूषितबाहुवल्लि—
रुन्निद्रचम्पकमनोहरगात्रयष्टिः ।
श्रीखण्डशैलशिखरे गजमोक्षितक्रोधै—
राभीरिका विदधतो स्रजमिन्दुशुभ्राम् ॥[4]

---

1. सङ्गीतमुक्तावली—॥—127.
2. सङ्गीतमुक्तावली—॥—128.
3. सङ्गीतमुक्तावली—॥—59.
4. सङ्गीतनारायण—।—222.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३—ककुभरागलक्षणम्—

षड्जन्या सग्रहांशान्ता सकम्पान्दोलितस्वरा ।
ककुभा हिमकाले तु गेया सम्पूर्णरागिणी ।।[1]

(ध्यानम्)

पीतं वसाना वसनं सुकेशी वने रुदन्ती पिकनाददूना ।
विलोकयन्तीं ककुभोऽतिमीता मूर्त्तिः प्रदिष्टा ककुभस्तथेयम् ।।[2]

४—कर्णाटरागलक्षणम्—

प्रोक्तः कर्णाटरागो मृदुगमधनिको मन्द्रमध्यस्वरस्थो
वादी तीव्रर्षभोऽत्र श्रवणमधुरसंवादिना पञ्चमेन ।
आरोहे दुर्बलो गः प्रविलसति सदान्दोलनं गे प्रयुक्तं
धोवर्जश्चावरोहे विदित इह भवेत्पूर्वकाले निशिथात् ।।[3]

अपरस्तु—

मृदु-गनिधमौ रिस्तु तीव्रेंऽशः प-सहायकः ।
गान्धारान्दोलनं यत्र कर्णाटः स निशिस्मृतः ।।[4]

---

1. सङ्गीतमुक्तावली—II—67 .
2. सङ्गीतदामोदरः—पद्यम्—37 .
3. उत्कलसङ्गीतपद्धतिः—पद्यम्—171 .
4. उत्कलसङ्गीतपद्धतिः—पद्यम्—71 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ध्यानम्)

कृपाभपाणिस्तुरगाधिरूढो
मयूरकण्ठातिमुकण्ठकान्तिः ।
स्फुरत्सितोष्णीषधरः प्रशान्तः
कर्णाटरागो हरिणान् विहन्तुम् ॥[1]

५—कर्णाटवङ्गालरागलक्षणम्—

गान्धारांशग्रहन्यासः षड्जपञ्चमवर्जितः ।
एष कर्णाटवङ्गालः शृङ्गाचेटकवंशजः ॥[2]

(ध्यानम्)

मनोज्ञमौक्तीगुणगुम्फिताङ्गत्वचं दधानो धरणीरुहस्य ।
चण्डः कुमारः कमनीयमूर्त्तिर्वङ्गालरागः शुचिसोमगानः ॥[3]

६—कलहंसरागलक्षणम्—

जातो यागप्रियामेलात्कलहंस इतीरितः ।
सन्यास साशकं चैव स षड्जग्रहमुच्यते ॥
आरोहेऽन्यवरोहे च गवज्यं षाड़वं तथा ।
सरिमपधनिसा सनिधपमरिसा ॥[4]

---

1. सङ्गीतमुक्तावली—II—92.
2. गीतप्रकाशः पञ्चमोल्लासः (OSM—Mss—Mus—3).
3. सङ्गीतमुक्तावली—II—123.
4. उत्कलसङ्गीतपद्धति—पञ्चम्—172.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

७—कल्याणनाटरागलक्षणम्—

कल्याणमेलसम्भूतोऽवरोहे गधवर्जितः ।
षड्जादिमूर्च्छनोपेतो रागः कल्याणनाटकः ॥[1]

८—काम्बोजीरागलक्षणम्—

काम्बोजी तीव्रगान्धारा गान्धारादिकमूर्च्छना ।
आरोहे मनिहीना स्यान्मध्यांशस्वरभूषिता ।
यदि गान्धारहीना स्यान्मूर्च्छना चोत्तरायता ॥[2]

९—कुरङ्गरागलक्षणम्—

रिस्तु तीव्रतरः प्रोक्तो मस्तु तीव्रतरो भवेत् ।
अति तीव्रतमो गः स्यान्नितीव्रः स्यात्कुरङ्गके ।
षड्जोद्ग्राहेण सम्पन्ने न्यासांशौ षड्जपञ्चमौ ॥[3]

१०—केदारगौड़ारागलक्षणम्—

अथ केदारगौलः स्यात्तीव्रगान्धारसंयुतः ।
रञ्जनी मूर्च्छनायुक्तः रिप्रयोगेन मण्डितः ॥
तथैव मप्रयोगेन पञ्चमांशेन शोभितः ।
आरोहे गधवर्जः स्यान्निस्वरांशः क्वचिन्मतः ॥[4]

११—कोलाहलरागलक्षणम्—

षड्जन्यासग्रहः कोलाहलाष्टक्कक्कुलोद्भवः ।
मध्यमांशः पहीनश्च कलहे गमकोत्कटः[5] ॥

---

1. सङ्गीतपारिजातम्—पद्यम्—181.
2. सङ्गीतपारिजातम्—पद्यम्—170.
3. सङ्गीतपारिजातम्—पद्यम्—188.
4. सङ्गीतपारिजातम्—पद्यम्—174.
5. संगीतमुक्तावली—II—155.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उन्मत्तपुंस्कोकिलवृन्दरम्यनादस्वरं गायति कृष्णगाथा ।
वशी सदा सर्वपुरः प्रवर्त्ती कोलाहलोऽयं करुणोऽरुणाङ्गः ॥[1]

१२—गान्धाररागलक्षणम्—

गान्धारको मध्यमजो मान्ताश्चैव सपोज्झितः ।[2]

अपरस्तु—

गान्धारको मध्यमजश्चमान्तः सपोज्झितः स्यात्करुणे सदैव[3] ॥

(ध्यानम्)

जटां दधानः कृतभूतिभूषः कापायवासास्तनुदेहयष्टिः ।
सयोगपट्टीकृतनेत्रमुद्रो गन्धारागः कथितस्तपस्वी ॥[4]

१३—गुर्ज्जरीरागलक्षणम्—

गुर्ज्जरी मालवोत्पन्नाऽवरोहे मनिवर्जिता ।
गश्लिष्टमध्यमोपेता धैवतशिल्प सस्वरा ।
गान्धारमूर्च्छनोपेता दाक्षिणात्या प्रकीर्त्तिता ॥[5]

(ध्यानम्)

श्यामासुकेशी मलयद्रुमाणां
मृदूज्ज्वलत्पल्लवतल्पयाता ।
श्रुतेः स्वराणां दधती विभागं
तन्द्रीमुखी दक्षिणगुर्ज्जरीयम् ॥[6]

---

1. संगीतमुक्तावली—II—156.
2. सङ्गीतमुक्तावली—II—195.
3. सङ्गीतनारायण—I—255.
4. सङ्गीतनारायण—I—256.
5. सङ्गीतपारिजातम्—यन्त्रम्—172.
6. संगीतमुक्तावली—II—66.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१४—गोण्डकिरीरागलक्षणम्—

षड्जन्यासग्रहांशैषा गोण्डाक्रिमपरिगता ।
रिधहीना दिनादौ च गातव्येष्टरसे बुधैः ॥[1]

(ध्यानम्)

रतोत्सुका कान्तपथप्रतीक्षामापादयन्ती मृदुपुष्पतल्पे ।
इतस्ततः प्रोषितदृष्टिरार्त्ता श्यामाङ्गिका गोण्डकिरी प्रदिष्टा ॥[2]

१५—गौड़ीरागलक्षणम्—

ग्रहांशन्यासषड्जा स्याद्गौड़ी मालवकौशिकात् ।
वीरशृङ्गारयोर्गेया सकम्पान्दोलितस्वरा ॥[3]

(ध्यानम्)

शुचिहरिचन्दनपङ्के रतिसहितं मन्मथं पुरःकृत्या ।
गौरतनुर्बहुविधिना गौड़ी परिपूजयत्येषा ॥[4]

१६—घण्टारवरागलक्षणम्—

घण्टारवो धैवतजः प्रभाते सर्वदा तथा ॥
घण्टारागो गपूर्वः स्यान्न्यन्तः कोमलधैवतः ॥[5]

---

1. गीतप्रकाशः—पञ्चमोल्लासः ।
2. संगीतनारायणः—I—246 .
3. सङ्गीतमुक्तावली—II—139 .
4. सङ्गीतनारायणः—I—181 .
5. सङ्गीतमुक्तावली—II—143 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ध्यानम्)

प्रसरदिभवरस्य स्कन्धमारुढ़ उद्य—
त्कनकरुचिरमध्यं धूनयन् शर्वलाग्रम् ।
प्रदलितरिपुसैन्यो भीमघण्टारवेण
स्फुरितकनककान्तिर्भाति घण्टारवोऽयम् ॥[1]

१७- छायानटरागलक्षणम्—

छायानटस्तु विज्ञेयः शङ्करामरणस्वरैः ।
आरोहणे निवर्जः स्यादवरोहे गवर्जितः
धैवतोद्ग्राहसंभुक्तो रिन्यासोऽनेकमध्यमः ॥[2]

१८—तोड़ीरागलक्षणम्—

षड्जपूर्वा तु तोड़ी स्याद्यत्रोक्तौ कोमलौ रिधौ ।
न्यासः स्याद्धैवतस्त्यां गान्धारांशेन शोभिता ।
मेनारोहे तूपन्यासा पञ्चमेनोभयोरपि ॥[3]

(ध्यानम्)

उन्निद्रपद्मे रुहचारुनेत्रा कुरङ्गशावं कलमाङ्कुरेण ।
सम्भावयन्ती विपिनोपकण्ठे तोड़ीयमिन्दीवरदामरम्या ॥[4]

---

1. सङ्गीतनारायणः—I—186 .
2. सङ्गीतपारिजातम्—पत्रम्—180 .
3. सङ्गीतपारिजातम् —पत्रम्—157 .
4. सङ्गीतमुक्तावली—II—134 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१६—दीपकरागलक्षणम्—

आरोहे मनिवर्जः स्याद्दीपको मालवोत्थितः ।
गान्धारोद्ग्राहसंयुक्तः सन्यासांशविभूषितः ॥[1]

(ध्यानम्)

प्रदोषकाले गृहसंप्रविष्टो प्रदीपहस्तारुणगात्रवस्त्रा ।
सीमन्तसिन्दूरविराजमाना सुरक्तमाल्या किल दीपिकेयम् ॥[2]

२०—देशाख्यरागलक्षणम्—

रि तीव्रतरसंयुक्तो ग-तीव्रेणापि संयुतः ।
धग-वर्जोऽवरोहे स्याद्गान्धार स्वरमूर्च्छनः ।
तीव्रो यत्र निषादस्य देशाख्यः स विराजते ॥[3]

(ध्यानम्)

आस्फोटनाविष्कृतलोमहर्षो नियुद्धसंनद्ध वेशालबाहुः ।
प्रांशुप्रचण्डद्युतिहेमगौरो देशाख्यरागः स हि मल्लराजः ॥[4]

२१—देशीरागलक्षणम्—

रेवगुप्तोद्भवा देशी प-त्यक्ता मनि-विस्तरा ।
निन्यासांशग्रहा प्रातर्गेया करुणहास्ययोः ॥[5]

---

1. सङ्गीतपारिजातम्—पत्रम्—171
2. शब्दकल्पद्रुमः—४थों भागः—पत्रम्—112 .
3. सङ्गीतपारिजातम्—पत्रम्—135 .
4. सङ्गीतनारायणः—I—207 .
5. सङ्गीतमुक्तावली—II—161 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ध्यानम्)

गजपतिगतिरेणीलोचनेन्दीवराङ्गी
पृथुलतरनितम्बा लम्बीवेणी भुजङ्गी ।
तनुतरतनुवल्ली वीतकौसुम्भवासा
इयमुदयति देशी रागिणो चारुहासा ॥[1]

२२—धनाश्रीरागलक्षणम्—

आरोहे रिधहीना स्यात्पूर्णशुद्धस्वरैर्युता ।
गान्धारस्वरपूर्वा स्याद्धनाश्रीर्मध्यमान्तका[2] ॥

(ध्यानम्)

दूर्वादलश्यामतनुर्मनोज्ञा कान्तं लिखन्ती फलके विदग्धा ।
बाला गलल्लोचनवारिबिन्दुनिष्यन्दधौतस्तनहृद्धनासो ॥[3]

२३—नटनारायणरागलक्षणम्—

धैवतांशग्रहन्यासो नटनारायणो दिवा[4] ॥

(ध्यानम्)

स्त्रीवेशधारो पुरुषो नवीनः सङ्गीतशाले भ्रमिमादधानः ।
गायन् सतालं मलयं मनोज्ञः स्यान्नाटनारायण एष रागः ॥[5]

---

1. सङ्गीतमुक्तावली—II—162.
2. सङ्गीतपारिजातम्—पद्यम्—102.
3. सङ्गीतनारायणः—I—201.
4. सङ्गीतमुक्तावली—II—54.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२४—नादरामक्रिरीरागलक्षणम्—

नादरामक्रिया गौरीमेलोत्पन्ना म-भूषिता ।
षड्जोद्ग्राहा च नि-न्यासारोहे गान्धारवर्जिता ॥[1]

(ध्यानम्)

हेमप्रभा भासुरभूषणा च
नीलं निचोलं वपुषा वहन्ती ।
कान्ते समीपे कमनीयकण्ठा
मानोन्नता रामक्रिरी मतेयम् ॥[2]

२५—नारायणीगौड़ारागलक्षणम्—

हरिकाम्बोजमेलाच्च गान्धारेणापि चोज्झिता ।
नारायणीति षड्जांशा चाधा त्वधिरोहणे ॥[3]

२६—पूरवीरागलक्षणम्—

गौरीमेलसमुत्पन्ना षड्जोद्ग्राहसमन्विता ।
न्यासांश-ग-स्वरापेता पूर्वी सा सुखदायिनी ॥[4]

(ध्यानम्)

रहःसु कान्तप्रेयमाणपत्रं रम्यं वहन्ती कुचकुम्भयुग्मे ।
दूर्वादलश्यामतनुः सकामा पुरातनैः सा पूरवो निरुक्ता ॥[5]

---

1. सङ्गीतमुक्तावली—II—55 .
2. सङ्गीतपारिजातम्—पत्रम्—185 .
3. अप्रकाशित रागः३योभागः—पत्रम्—38 .
4. सङ्गीतपारिजातम्—पत्रम्— 8 .
5. शब्दकल्पद्रुमः ४थोंभागः—पत्रम्—111 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२७—भिन्नषड्जरागलक्षणम्—

अपरः शुद्धजः प्रोक्तः सौडुवो भिन्नषड्जकः ।
मध्यरात्रौ सुशान्ते च मध्यमे गीयते बुधैः ॥[1]

२८—भूपालरागलक्षणम्—

मनिवर्जा तु भूपाल रिधौ यत्र च कोमलौ ।
गान्धारोद्ग्राहसंयुक्ता रिन्यासागांशशोभिता ॥[2]

(ध्यानम्)

स्वनायकं पुष्पलताधिरूढा हसन्मुखी सर्वमुदं वहन्ती ।
स्वनानि शश्वद्वितनोति मुग्धा भूपालिका सा स्खलदुत्तरीया ॥[3]

२९—भैरवरागलक्षणम्—

धैवतांशग्रहन्यासयुक्तः स्याच्छुद्धभैरवः ।
सकम्पमन्द्रगान्धारो ज्ञेयः सम्पूर्णरागराट् ॥[4]

(ध्यानम्)

सचन्द्रहासं फलकं दधानो निबद्धकक्षो दृढबद्धचूडः ।
गतिं वितन्वन्बहुधो पदातिः प्रचण्डरूपः किल भैरवोऽयम् ॥[5]

---

1. अप्रकाशितरागः ३योभागः—पत्रम्—13 .
2. सङ्गीतपारिजातम्—पत्रम्—145.
3. शब्दकल्पद्रुमः ४र्थो भागः—पत्रम—112 .
4. सङ्गीतमुक्तावली—II—26 .
5. सङ्गीतनारायणः—I—143 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३०—भैरवीरागलक्षणम्—

सस्वरांशग्रहन्यासा भैरवी सार्द्धकोमला।
रिणारोहे तूपन्यासा पञ्चमे नोभयोरपि।
षड्जेनाथावरोहे तु सर्वदा सुखदायिनी ॥[1]

(ध्यानम्)

सरोवरस्था स्फटिकस्य मण्डपे
सरोरुहैः शङ्करमर्च्चयन्ती।
नालप्रयोगैःप्रतिबद्धगीता—
गौरीतनुर्नारदभैरवीयम् ॥[2]

३१—मङ्गलगुज्जरीरागयोः लक्षणम्—

कौशिक्यां वोट्टरागे वा मङ्गलं मङ्गलैः पदैः।
विलम्बितलये गेयं मङ्गलछन्दसाथवा ॥

× × ×

।रन्यासः रिमयाश्चैव सङ्गता निग्रहांशिका।
षड्जान्ता गुर्ज्जरी पूर्णा भाषा मालवकैशिके ॥[3]

(ध्यानम्)

कर्णोत्पलालम्बिमधुव्रताली
शृणोति सा मञ्जुलकूजितानि।
कान्तान्तिकं गन्तुमना प्रदोषे
सा गुज्जरीवेशकलोचिताङ्गी ॥[4]

---

1. सङ्गीतपारिजातम्—पत्रम्—143.
2. सङ्गीतनारायणः—I—242.
3. उत्कलसङ्गीतपद्धतिः—पत्रम्—234.
4. शब्दकल्पद्रुमः ४र्थो भागः—पत्रम्—112.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३२—मध्यमादिरागलक्षणम्—

मध्यमादिर्ग्रहान्तो मध्यमग्रामगोचरः ।
अयं सायं तु गातव्यः शृङ्गारे रिधवर्जितः ॥[1]

(ध्यानम्)

अतितरुणवयः श्रीः कुन्दकर्पूरकान्ति
र्युवतिभजनदक्षः क्रौञ्चचाटूक्तिभाषः ।
अरुणजलजनेत्रः स्कन्धसंन्यस्तवीणः
स्मितमधुररदाली राजते मध्यमादिः ॥[2]

३३—मल्हारीरागलक्षणम्—

गौरीमेलसमुद्भूता मल्हारीनिस्वरोज्झिता ।
आरोहणे गहीना स्यात षड्जादिस्वरसम्मता ॥[3]
पञ्चमांशग्रहन्यासा ग-हीना चन्द्रमध्यमा ।
शृङ्गारे दुर्दिने गेया मल्हारी पाड़वी मता ॥[4]

(ध्यानम्)

विस्पष्टकृष्णाजिनमध्यवर्त्ती
कान्तः पवित्रः स्थविरोऽतिगौरः ।
कुर्वन्कथां तुम्बुरुनारदाभ्यां
मल्हारिकेयं कथिता कवीन्द्रैः ॥[5]

---

1. सङ्गीतमुक्तावली—II—183 .
2. सङ्गीतनारायणः—II—231 .
3. सङ्गीतपारिजातम्—पत्रम्—125 .
4. सङ्गीतमुक्तावली—II—24 .
5. सङ्गीतमुक्तावली —II—25 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३४—मल्लाररागलक्षणम्—

धांशन्यासः पानृयजो मल्लारः सपवर्जितः ।
सदा वर्षास्वप्ररसे गमन्द्रास्तारसप्तयः ॥[1]

(ध्यानम्)

शृङ्गावदातं पलितं दधानः प्रलम्बकर्णः कुमुदेन्दुवर्णः ।
कौपीनवासः शुचिहारधारी मल्लारराग: कथितस्तपस्वी ॥[2]

३५—मारुधनाश्रीरागयाः लक्षणम्—

तीव्रौ गमौ धनौ चैव मृदुरि-धैवतपंमौ ।
सम्वाहिवादिनौ यत्र स मारु सायमीरितः ॥[3]
आरोहे रिधहीनां स्यात्पूर्णशुद्धस्वरैर्युता ।
गान्धारस्वरपूर्वा स्यादधनाश्रीर्मध्यमान्तका ॥[4]

(ध्यानम्)

दूर्वादलश्यामतनुर्मनोज्ञा कान्तं लिम्बन्ती फलके विदग्धा ।
बाला गलल्लोचनवारिविन्दुनिष्यन्दधौतस्तनहृद्धनासो ॥[5]

---

1. सङ्गीतमुक्तावली—II—185.
2. सङ्गीतनारायणः—I—233.
3. उत्कलसङ्गीतपद्धति —पत्रम्—231.
4. सङ्गीतपारिजातम्—पत्रम्—102.
5. सङ्गीतनारायणः— —

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३६—मालवगौड़ारागलक्षणम्—

अथ मालवगौलेऽस्मिन् गौरीस्वरसमुद्भवे ।
त्यक्त धे रि स्वराद्ग्राहे न्यासारोहे सुगस्वरः ।
आरोहे यदि गान्धारः पादिमान्तो विधीयते ॥[1]

(ध्यानम्)

वीणाविनोदप्रतिपन्नपाणिगृंह्नन् कथां नारदसंप्रयोगाम्
श्यामो युवा विप्रकुलप्रसूतः स सालगो नाट्यमुनिप्रणीतः ॥
(सालगगौड़ = इति नामान्तरं पुस्तकान्तरे ।)[2]

३७—मालश्रीरागलक्षणम् —

मालवश्रीः शरद्गेया जातामालवकौशिकात् ।
एषा षड्जग्रहन्यासा पार्वतीप्रीतिकारिणी ॥[3]

(ध्यानम्)

लोलारविन्दस्य दलानि बाला विभावयन्ती तनुदृष्टिः ।
मालूरवृक्षस्य तले निषण्णा सा मालवश्री कथिता मुनीन्द्रैः ॥[4]

अपरश्च—

करावधूताम्बुजयुग्मरम्या इतस्ततश्चारु वेलोकयन्ती ।
कण्ठस्फुरन्मौक्तिकचारुहारा सा मालसी संकथिता विचित्रा ॥[5]

---

1. सङ्गीतपारिजातम्—पत्रम्—177 .
2. सङ्गीतनारायणः—I—221 .
3. संगीतनारायणः—I—165 .
4. सङ्गीतमुक्तावली—II—75 .
5. सङ्गीतमुक्तावली—II—74 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३८ –मुखारीरागलक्षणम् –

ऋषभः कोमलो यत्र गान्धारः पूर्वसंशकः ।
मुखार्य्यां धैवतोद्ग्राहौ निधौ पूर्वाल्पकोमलौ ।
आरोहे गनि-हीनायां न्यासांशौ षड्जपञ्चमौ ।।[1]

(ध्यानम्)

देवपुष्पं करे धृत्वा तिष्ठत्येकान्तमन्दिरे ।
गीताभिनयविज्ञाता रक्तवर्णा मुखावरी ।।[2]

३९ – रामकिरीरागलक्षणम् –

रिकोमला गतीव्रा च यामतीव्रतरसंयुता ।
ध-कोमला नि-तीव्रा च ख्याता रामकिरीति सा ।
आरोहे मनिवर्जा स्यात्सप्तांशा धैवतमूर्च्छना ।।[3]

अपरश्च –

प्रहराभ्यन्तरे गेया षड्जन्यासग्रहांशका ।
षड्जर्षणधनारम्भा तज्ज्ञैः रामकृतिर्मता ।।[4]

(ध्यानम्

स्वर्णप्रभा भासुरभूषणा च नीलं निचोलं वपुषा वहन्ती ।
कान्तं पदोपान्तमुपागतेऽपि मानोन्नता रामकिरी प्रदिष्टा ।[5]

---

1. सङ्गीतपारिजातम् —पद्यम् —141.
2. सङ्गीतनारायणः—I—269 .
3. सङ्गीतपारिजातम्—पद्यम् —164.
4. सङ्गीतमुक्तावली —II—78.
5. संगीतनारायणः—I—173 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

४०—रेवगुप्तिरागलक्षणम्—

रेवगुप्तिस्तथा षड्जमध्यमग्रहसंभवः ।
रि-ग्रहांशो मध्यमान्तो रसे वीरे नियुज्यते ॥[1]

(ध्यानम्)

अङ्के निषण्णा सुरतान्तखेन्नामाश्वासयन् स्वाञ्चलवीजनेन ।
सोमन्तिनीं श्वासचलत्कुचान्तां सुवर्णकान्तिः किल रेवगुप्तिः ॥[2]

४१—ललितरागलक्षणम् –

या गौरीरागसम्भूता ललिता पञ्चमोज्झिता ।
सांशोद्ग्राहा तथा मान्ता गीतान्ते सा सुशोभना ॥[3]

(ध्यानम्)

प्रसन्नसच्छदमालभारी युवातिगौरीलसल्लोचनश्रीः ॥
विनिसृता वासगृहात् प्रभाते विलासवेशो ललिता प्रदिष्टा ॥[4]

४२—वङ्गालरागलक्षणम् –

वङ्गालः कौशिकीजातः षड्जन्यासग्रहांशकः ।
सकम्पमन्द्रगान्धारो गेयः करुणहास्ययोः ॥[5]

---

1. गीतप्रकाशः—पञ्चमोल्लासः
2. सङ्गीतनारायण—I—138.
3. सङ्गीतपारिजातम्—पञ्चम—171.
4. सङ्गीतमुक्तावली—II—45.
5. सङ्गीतमुक्तावली—II—39

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षाड़वादेव वङ्गालो ग्रहांशन्यासमध्यमः ।
प्रहर्षे विनियोक्तव्यः प्रोक्तःसोढ़लसूनुना ॥[1]

(ध्यानम्)

मनोज्ञमौर्जीगुणगुम्फिताङ्गस्त्वचं दधानो धरणीरुहस्य ।
चण्डः कुमारः कमनीयमूर्त्तिर्वङ्गालरागः शुचिसामगानः ॥[2]

४३—वङ्गालगौड़रागयोर्लक्षणम्—

वङ्गाल शाश्वतिकः पूर्णः सांशग्रहश्च सन्यासः ।[3]

× × ×

निषादांशग्रहन्यासो गौड़ः स्यात्पञ्चमोज्झितः ।
वोरभृङ्गारयोर्गेयो दिनान्ते विरलर्षभः ॥[4]

(ध्यानम्)

भस्मावृता नरकपालधरा त्रिशूला
व्याघ्राम्बरा च कुपिता कुकुभेषु दीप्ता ।
रौद्रानना झटिति डिण्डिममारभन्ती
वङ्गालिका प्रथितभैरव भामिनी सा ॥[5]

---

1. सङ्गीतपारिजातम्—पत्रम्—152.
2. सङ्गीतमुक्तावली—II—40.
3. सङ्गीतपारिजातम्—पत्रम्—152.
4. सङ्गीतमुक्तावली—II—159 .
5. सङ्गीतपारिजातम्—पत्रम्—154.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपरश्च—

विधाय शम्भुं सुरनिम्नगातटे मुदार्च्चयन्नीलसरोजसंधैः ।
मनोज्ञमूर्त्तिर्दधदंशुके सिते त्वगासनस्थो द्विज एष गौड़कः ॥[1]

४४—वसन्तरागलक्षणम्—

षड्जमध्यमिकाजातः षड्जन्यांशग्रहांशकः ।
गेयो वसन्तरागोऽयं वसन्तसमये बुधैः ॥[2]
षड्जादि मूर्च्छने मान्ते गनी तीव्रौ वसन्तके ॥[3]

(ध्यानम्)

शिखण्डिवर्होच्चयबद्धचूड़ः पुष्णन् पिकं चूतलताङ्कुरेण ।
भ्रमन्मुदारामविहारमूर्त्तिर्मतो मतङ्गस्य वसन्तरागः ॥[4]

४५—बहुलारागलक्षणम्—

गौरीमेलसमुद्भूता बहुला मध्यमोदिता ।
स-वियोगं विना युक्ता गान्धारोद्ग्राहपांशका ॥[5]

४६—वेलावलीरागलक्षणम्—

वेलावल्यां गनौ तीव्रौ मूर्च्छना याभिरुद्गता ।
आरोहे मनि नायामंशः षड्जो बुधैः स्मृतः ।
अवरोहे ग-वर्जायां क्वचिद्गान्धारमूर्च्छना ॥[6]

---

1. सङ्गीतमुक्तावली—II—160 .
2. गीतप्रकाशः—पञ्चमोल्लासः (OSM—Mss. No. Mus—3)
3. सङ्गीतपारिजातम्—पञ्चम्—130 .
4. सङ्गीतमुक्तावली—II—14 .
5. सङ्गीतपारिजातम्—पञ्चम्—172 .
6. सङ्गीतपारिजातम्—पञ्चम्—169 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ध्यानम्)

सङ्केतशिक्षां दयितस्य दत्ता वितन्वती मण्डनमङ्गयष्टेः ।
मुहुः स्मरन्तीस्मरमिष्टदेवं वेलावली नीलसरोजकान्तिः ॥[1]

४७—शङ्कराभरणरागलक्षणम्—

शङ्कराभरणे प्रोक्तौ गनी तौत्रौ तु स्यादिमे ।
ग-न्यासे मध्यमांशे च तालुकम्पः सुशोभते ॥[2]

(ध्यानम्)

व्याघ्रचर्मशकलं पिदधानो भोगिहारवलयाङ्गदभूषः ।
सान्द्रभूतिपरिलिप्तशरीरः शङ्कराभरण एष हि रागः ॥[3]

४८—शुद्धनाटलक्षणम्—

नाटे निशि शुचौ वीरे षड्जांशो गमकोत्कटः ।[4]

(ध्यानम्)

तुरङ्गमस्कन्धनिबद्धरागः स्वर्णप्रभः शोणितशोणगात्रः ।
संग्रामभूमौ विचरन् धृतासिर्नाटोऽयमुक्तः किल काश्यपेन ॥[5]

---

1. सङ्गीतमुक्तावली—II—36 .
2. सङ्गीतपारिजातम्—पत्रम्—167 .
3. सङ्गीतमुक्तावली—II—148 .
4. सङ्गीतनारायण—I—182.
5. सङ्गीतमुक्तावली—II—142 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

४९—शुद्धवराड़ीरागलक्षणम्—

अथ शुद्धवराड्यां तु रिगौ कोमलपूर्वकौ ।
गस्तु तीव्रतरो धः स्यात्कोमलस्त्रीत्रनिस्वरः ।
धैवतोद्ग्राह्ययुक्तायां निमौ न्यासांशकौ स्मृतौ ॥[1]

(ध्यानम्)

विनोदयन्ती दयितं च गौरी सुकङ्कणा चामरचालनेन ।
कर्णे दधाना स्मरपुष्पगुच्छं वराङ्गनेयं कथिता वराड़ी ॥[2]

५०—शुद्धवङ्गालरागलक्षणम्—

वङ्गालः शाश्वतिकः पूर्णः सांशग्रहश्च सन्न्यासः ।
शुद्धवङ्गालः पूर्णोः सांशन्यासग्रहो व्युष्टे ॥[3]

५१—शुद्धवसन्तरागलक्षणम्—

षड्जादि मूर्च्छने मान्ते गनी तीव्रौ वसन्तके ।
शुद्धवसन्तमेले सरिसपधा अन्तरश्च काकलिका ॥[4]

५२—श्रीरागलक्षणम्—

रि-त्रयोद्ग्राहसंयुक्तः षड्जोद्ग्राहोऽथवा मतः ।
श्रीरागस्तीव्र गान्धारः आरोहे ग-ध-वर्जितः ॥[5]

---

1. सङ्गीतपारिजातम्—पत्रम्—157.
2. सङ्गीतनारायणः—1—158.
3. सङ्गीतपारिजातम्—पत्रम्—152.
4. सङ्गीतपारिजातम्—पत्रम्—130.
5. सङ्गीतपारिजातम्—पत्रम्—183.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ध्यानम्)

लीलावतारेण वनान्तराले
चिन्वन्प्रसूनानि वधूसहायः ।
विलासवेशोऽसितदिव्यमूर्त्तिः
श्रीराग एष प्रथितः मुनीन्द्रैः ॥[1]

५३—सोमवराड़ीरागयो लक्षणम्—

जातिन्यासग्रहांशेषु षाड्जो वीरे धनागमे ।
निःतारः पनिवाहुल्यः सोमरागोऽत्र गीयते ॥[2]
ग्रहरादूद्ध्वंतो गेया भिन्नपञ्चमसम्भवा ।
षड्जन्यासग्रहांशैषा वराड़ी भरतोदिता ॥[3]

(ध्यानम्)

विनोदयन्ती दयितं च गौरी सुकङ्कणा चामरचालनेन ।
कर्णे दधाना सुरपुष्पगुच्छं वराङ्गनेयं कथिता वराड़ी ॥[4]

५४—सालंकनाटरागलक्षणम—

शङ्कराभरणोत्पन्ने गान्धारस्वरवर्जिते ।
अथ सालंकनाटेऽस्मिन् सन्यासांशसमन्विते ।
षड्जोद्ग्राहेण सम्पन्ने मधावान्नेडितौ स्मृतौ ॥[5]

---

1. सङ्गीतमुक्तावली—II—70 .
2. सङ्गीतमुक्तावली—II—125.
3. सङ्गीतनारायणः—I— .
4. सङ्गीतमुक्तावली—II—88 .
5. सङ्गीतपारिजातम्—पत्रम्—179.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५५—सोमरागलक्षणम्—

षाड्जी जातिसमुत्पन्नः षड्जन्यासग्रहांशकः ।
नितारः परिवाहन्यो रसे वीरे नियुज्यते ।
मेघो छायागमे गेयः सोमराग मतः सताम् ॥[1]

(ध्यानम्)

निशाङ्गनां वक्षसि शाययित्वा कलङ्कदम्मात्सुरतश्रमार्त्तः ।
स्खलत्करः सालसलोचनश्रीः कामी सुधापाण्डर एष सोमः ॥[2]

५६—सौराष्ट्रागलक्षणम्—

मायामालवमेलाच्च रागः सौराष्ट्रनामकः ।
सन्याससांसकं चैव स षड्जग्रहमुच्यते ।
आरोहे तु सुसम्पूर्णमवरोहे तथैव च ।
स रि ग म प ध नि स सनिधपमगरिस ॥[3]

५७—हिन्दोलरागलक्षणम्—

षड्जन्यासग्रहांशोऽयं हिन्दोलो रि-प-वर्जितः ।
अधैवतर्षभाद् जातो वीरशृङ्गारयोः सदा ॥[4]

(ध्यानम्)

नितम्बिनीमन्दतरङ्गितासु दोलासु खेलासुखमादधानः ।
सर्वः कपोद्युतिकर्बूर श्री हिन्दोलरागः कथितो मुनीन्द्रैः ॥[5]

---

1. गीतप्रकाशः—पञ्चमोल्लासः .
2. सङ्गीतमुक्तावली —II—126 .
3. उत्कलसङ्गीतपद्धति —पद्यम्—245.
4. गीतप्रकाशः—पञ्चमोल्लासः .
5. सङ्गीतनारायणः—I—240 .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागाणामनुक्रमणिका

रागनामानि	पृष्ठाङ्काः	रागनामानि	पृष्ठाङ्काः
आम्रपञ्चम्	७८	दीपकम्	४३
आभीरी	२६	देशाख्यः	५१
ककुभः	३६	देशी	३३
	८२		६४
कर्णाटः	२४	धनाश्री	५८
	७१	नटनारायणः	७०
कर्णाटवङ्गालः	५४	नादरामकिरी	८
कलहंसः	१२		५६
	५०	नारायणदेशाख्यः	३६
कल्याणनाटः	२६	नारायणीगौड़ा	१७
काम्भोजी	३५	पुरवी	८६
कुरुञ्जी	८७	मिश्रषड्जः	६१
केदारगौड़ा	३१	भूपालः	१३
कोलाहलः	४६		३१
गान्धारः	५६	भैरवः	७२
गुज्जरी	४	भैरवी	६
	८०		४३
गौण्डकिरी	६	मङ्गलगुज्जरी	६२
गौड़ी	२५	मध्यमादिः	८८
	६६	मल्लारः	४२
घण्टारवः	४५		६२
चिन्तादेशी	२३	मल्लहारी	६७
छायानाटः	४०	मारुधनाश्री	१०
तोड़ी	६६	मालवगौड़ा	२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागनामानि	पृष्ठाङ्काः	रागनामानि	पृष्ठाङ्काः
मालश्री	२२	शङ्कराभरणम्	४८
मुखारी	१८	शुद्धनाटः	३५
	७७	शुद्धवराड़ी	३८
रामकिरी	७		६०
रेवगुप्तिः	८३	शुद्धवङ्गालः	६०
ललितम्	१७	शुद्धवसन्तः	२१
	२६	श्रीरागः	४६
वङ्गालः	७५	सामवराड़ी	८५
वङ्गालगौड़ा	२०	सालकनाटः	७६
वसन्तः	५	सोमः	५२
वहुला	१४	सौराष्ट्रगुज्जरो	१६
वेलावली	८६	हिन्दोलः	५७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रबन्धानामनुक्रमणिका

प्रबन्धाः	पत्राङ्काः
(अ)	
अपि सा भवता विगुणा	३५
अर्द्धं तनुमयवामनयनं	७७
अविरलकल्पिततरल	५१
असित सरसिज गन्ध	७
(आ)	
आलीदानीमुदारे	३३
(उ)	
उदचलदाशु	३८
उद्धृतनिगमनिकायं	६२
(क)	
कलकण्ठमधुरवाणी	५०
कस्तूरीतिलकं	२६
कामकेलिकलाजनितं	३१
किं मयापि हताशया	४३
किं मया वत	४।
किमवधारितचरण	३६
किशलयशयने विनिहित	२१
कुञ्जे कुञ्जे मलय	४६
कुन्तलालि समाकुलं	६६
कुसुमसञ्चयचारु	१२
कुसुमसम विचिनोति	७१
कुसुमसायकसायकावलि	५४
कृतिनिपुणा मुदेतगुणा	४३
केलिकर्मणि जानत	६६
केलिलालसमन	६४

प्रबन्धाः	पत्राङ्काः
(घ)	
घनतिमिरचर	३४
(च)	
चन्द्रचन्दनघन	४२
चन्द्रचन्दनमन्द	१४
चूततरु नवमुकुल	१७
(त)	
तपसमयाकुल	८०
तमसि घने प्रथमाने	१८
तवकलयामि सकामं	६०
तव परं गुरु	५६
(ध)	
धारयाम्यनवेक्ष्य	५६
(न)	
न कुरु सुधाकर	६७
नववनविपिने	५
न युदुपलम्ममृते	८७
निविड़कुचपरिपीड़	८६
(प)	
पथिकजनहृदयानि	७६
प्रियसमागमपथ	७५
(भ)	
भजमाना मृदुपद	८३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रबन्धाः	पत्राङ्काः	प्रबन्धाः	पत्राङ्काः
(म)		वनमिव दवदहनो	७२
मधुरमधुरस	३१	वहलपरागसमूह	८२
मधुरमन्दविकारं	१३	वारिपूरितगगन	२
मधुसमयोदित	२५	विजितरतिरुचि	७०
मन्थरागतिरधिक	६	विधिवशगे निजवन्धौ	५२
मम वपुरन्तरुपेता	१०	विरही सीमन्तिनी	६
मलयजपङ्कविलेपन	८	(श)	
मलयजपवने	२०	शिशिरशीतल	४६
मलय एव न मृदु	१७	शूलविदलित	७८
मृदुलकिशलय	८६	श्रवणपथमनुविशति	२२
मृदूनि शयने	६०	(स)	
मोहमुपेतं तं	२३	संयमयामि सुकेशि	६१
(य)		समुदित शशधर	२४
यदि पुनरधुना	४०	सुरतविलम्बमासेवितुं	८८
(र)		सुरतसमरविमर्दिनि	५७
रूपमेव विलिखति सा	१६	सुललित-वर्हिण	४
(ल)		स्खलितचरणगति	२६
लोकय मवदनुरूपं	६२	(ह)	
(व)		हिमकर कर	४८
वदनमुन्नमयाधुना	८५	हिमयमुनाजल	३६
वदने श्रमजल	२६	हृदयं जलमवकुसुम	५८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लोकानामनुक्रमणिका

श्लोकाः	पत्राङ्काः	श्लोकाः	पत्राङ्काः
(अ)		(आ	
अत्रान्तरे छलकृते	३७	आचार्य्यकं मदन	४६
अथ कमलिनीनिद्रा	५२	आनन्दयामि	८४
अथ तन्निधुवन	६१	आसादिताः कति न	४२
अथ तपनसुता	३७	(इ)	
अथ त्यक्त्वा मानं	४१	इति प्रवृत्तैर्बहु	६३
अथ निजभवने	२०	इति बहुविलपन्तं	१६
अथ निधुवनसिद्धिं	२८	इति विरचितबन्धैः	६१
अथ प्रभाते सुरतान्त	५४	इति विरचितवेशां	६२
अथ मदनतापदूनं	८५	इति विरहावस्थां	२४
अथ रोषकषायिताशया	२८	इत्युदीर्य्य रचित	५६
अथ सविधमुपेता	७	इह हरिविरह	६
अथ सविधमुपेत्या	३०		
अथ सहचरीनर्म्मालापं	३७	(उ)	
अथ सा कृतसङ्केता	४५	उच्चण्ड-चण्डकरदीप	२६
अथ सा तदीयवचसा	४६	उद्गर्जितेन पटहा	७८
अथ सा तद्वचनान्ते	६	उदञ्चत्करुणां वाच	६
अथानुतापविधुरं	३६	उद्यत्फुल्लकदम्ब	७५
अथानुनीय	३४	उन्मीलत्कलनाद	४४
अथानुनेतुं	६७	उपचितमदनविकारा	३८
अथातुरां तामधिगत्य	११	उल्लसत्प्रणयवन्ध	२५
अधरे विनिहित	४	(ए)	
अन्तः प्रमोद	८५	एतस्मै यदकृत्रिम	८८
अनादृत्य क्रीड़ा	३४	एतर्हि केतकशिखा	८३
अहमिह परिपाकं	३४	एता मारुतविप्रकीर्ण	६२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लोकाः	पत्राङ्काः
(क	
कण्ठे जीवंकर	१८
कति न भवता	५५
करकापुष्पविशिखा	८२
कस्त्वं तास्तु यदृच्छया	५८
कान्तिः काञ्चनकेतकी	६८
कान्ते कस्य ममैव	७१
कान्ते रक्तोत्पलदल	६८
का नन्दीजलकेलि	१
कालुष्यं पयसां	६१
कालो वसन्तो	६
काश्मीरं मणिमुज्ज्वल	८६
किं मया न गणितो	३२
केतकी मुकुल	५
केतक्या मुकुले	५
कौटिल्यं चिकुरे	१४
(क्ष)	
क्षणमपिमनुते	२१
क्षामप्रकोष्ठविगलद्	८०
(ग)	
गोपीजनालिङ्गित	४
(घ)	
घनतरमकरन्द	२२
घनतिमिरमसीमि	४३
(ज)	
जहाति प्रेमाणं	५६
जातीमभिनव	७७
(त)	
तदा मध्ये तोयं	४६

श्लोकाः	पत्राङ्काः
तमोभिः कालुष्यं	४१
तानि प्रियाणि वचनानि	३१
तामेवेक्षण	१४
तुमुले रतिसङ्करे	६०
(द)	
दार्वाघाटनिकुट्टनेन	७३
दुस्त्यजं तमवगत्य	६५
दूरीकृतकनक	४७
दृष्टिमङ्गिगमित	७४
दैर्घ्यं लोमलता	२३
द्वित्राणि कृच्छ्रं	१३
(ध)	
धन्यानामसवः	६५
धारापातैरुपवन	७६
(न)	
न कचिच्चिन्ता ते	६
नमते जपति	२२
नित्यानन्द चिदात्मना	६३
निधाय त्वामग्रे	८७
निन्दन्तु नितरां	१
निम्नोन्नतपरिज्ञान	२६
नैराश्यं विकला	६०
(प)	
पङ्कावलेऽवनितले	७६
परस्परासक्चित	२५
पाणिभ्यां कपटेन	८६
प्रक्रान्ते सुरत	२८
प्रणयिनि विलम्बमाने	८७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रबन्धाः	पत्राङ्काः	प्रबन्धाः	पत्राङ्काः
प्रतिवचनदान	७१	(र)	
प्रतिमुहुरुदयन्ती	१६	रतितन्त्रनियामक	८२
प्रत्यागमाशाति	१६	राधा मुरारिरमणीय	२
प्रमोदमानेन	८५	राधाया किमपि	७०
प्रबोधिता सा बहुधा	३०	राधिकांशुकमपत्र	८६
प्रसरति निदाघ	७१	राधिकाथ भणितानि	६०
प्रसूनै र्भूयोभिः	५०	(ल)	
(भ)		लज्जया गमनमन्थर	८७
भुजगभवनं भानौ	३७	लीयन्ते सहजारयोऽपि	८१
(म		(व)	
मधुमथननितान्त	२७	वदन कमललक्ष्मी	६७
मधुवशमधुपाली	७२	वने भ्रमन्त्या	३६
मध्येऽनिशं भजति	४८	वाता वान्तु पिका	६२
मनोगतां मन्मथ	७	विपिने परिभ्रमन्ती	२६
मनोजन्मा धन्वी	११	विप्रियं बहुशः कृत्वा	५६
मनोजबाण	३५	विरहमनुभवन्ती	११
मलयजघनसार	८	विरहमसहमाना	३२
मा मुञ्च पञ्चशर	५०	विरहावमानदूना	५८
मुरारिरपि राधाया	४५	विरहितरुणीहत्या	२६
मुरारिरपि राधायाः	५५	विलीनप्रेमाणं	४०
(य)		विश्राम्यन्ति मधुद्रवा	७०
यन्नागतः ससमयं	५१	व्यतीताः प्रारम्भाः	४४
यस्याः कृपामृतनिषेक	१	(श)	
यामि कुत्र करवाणि	३५	शृणुत सुकृत	१
यावच्चित्ते न भवति	६०	श्वासान्मुञ्चति मन्द	१७
यावत्पुरो मिलसि	२४	(स)	
ये सखि सुखमादधते	१०	संवाहयामि चरणा	८८
		सख्यं विनश्यतु	५३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रवन्धाः	पत्राङ्काः	प्रवन्धाः	पत्राङ्का
सख्यामथामिमुख्यं	८८	सापि तत्र सविधे	४२
सख्या श्रीमधुसम्पदा	४७	सा सखीं सरभसं	२१
स च तां तृथु	१२	स्वान्तं हन्त विवेक	१४
समुल्लसति मल्लिका	६६	स्वेच्छयोपगम	६१
सरसिज कुट्मल	२१	(ह)	
स्फुटन्ति श्रावाण	७३	हतत्रीड़ा क्रोड़ा	३६
स्मरशरधृतातङ्के	२४	हुं कृतैर्मधुलिहा	७५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छन्दसामनुक्रमणिका

छन्दसांनामानि	सर्गसंख्याः	श्लोकाङ्काः
अनुष्टुप्	१	१५
	३	१२
	४	१२
	६	१, २
	७	३, ५, ११
	६	११
आर्य्या	१	७, १०, १७, १८
	३	१, २, ८
	४	५
	५	५
	६	५
	७	७, १३
	८	१२, १३
	६	४, ६
	१०	१, ८
इन्द्रवज्रा	१	१४,
उपजाति	१	६, १२
	२	२, ७
उपेन्द्रवज्रा	७	१६
पुष्पिताग्रा	४	६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छन्दोसांनामानि	सर्गसंख्या	श्लोकाङ्काः
	५	१, १२
पृथ्वी	८	८
प्रहर्षिणी	४	३
मन्दाक्रान्ता	२	६
	७	१०
	८	७
	६	७
मालभारिणी	६	१०
	१०	११
मालिनी	१	३, ११, १३, २१
	२	६, १०
	३	४, १५
	४	१, १०, ११
	८	४, १४
	१०	१३, १५
रथोद्धता	३	३, ११
	४	६
	५	१०
	८	३, १०, १७
	६	१
	१०	६, १०, १२
वंशस्थविलम्	१	२०
	३	१०
	४	७, १५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छन्दसां नामानि	सर्गसंख्या	श्लोकाङ्काः
	५	६
	७	१
	८	१, ५
	१०	२
वसन्त तेलकम्	१	२, ५
	३	७. १३
	४	२, ८
	५	३, ११
	६	३, ७, ८, १०, ११, १२
	६	३, ५, ८, १२, १३
	१०	३
वियोगिनी	२	९
	४	४
शार्दूलविक्रीड़ितम्	१	१, ४, ६
	२	३, ४, ५, ८
	३	६
	५	१३
	६	६
	७	४, ६, १२, १४, १५
	८	२, ६, ६, ११, १६
	६	२ ६
	१०	४, ७, ६, १६
शिखरिणी	१	१६, १६
	४	१३, १६
	५	७, ८, ६ १४,
	६	४, ६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छन्दसां नामानि	सर्गसंख्या	श्लोकाङ्काः
	७	८
	८	१५
	१०	५
स्वागता	१	८
	३	५
	४	१४
	७	६
	१०	१४
हरिणी	३	६, १४
	५	२, ४
	६	१२
	७	२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुद्धिपत्रम्

पत्रम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१	१४	सुकृतमेतां	सुकृतिमेतां
३	५	मच्चुंतम्	मच्युतम्
३	१४	विहितमत्र	विहितमत्त
४	२	कक्किन	कल्किन
४	३	मच्चुतम्	मच्युतम्
५	४	शभमणिबन्धम्	शुभमणिबन्धम्
६	१०	विलुलदधर	विलुलदधर
६	१६	ाक मुधा	किं मुधा
७	२२	रुचिरगण्डम्	रुचिरुचिरगण्डम्
८	८	स्फारमौर्तांशुरोचि	स्फारशीतांशुरोचि
८	६	चारामङ्गसङ्गं	चारा अङ्गसङ्गं
६	१४	दिनमुखीं	दोनमुखीं
१२	३	स चरता	स च तां
१३	३	कलयसेऽलं	कलयतेऽलं
१४	१४	रोमावला	रोमावली
१६	१०	विलसति—वीक्षते	विलिखति—वीक्ष्यते
१७	१४	स्वासान्मुञ्चति	श्वासान्मुञ्चति
१७	२२	अङ्गसङ्गीन	अङ्गसङ्गिन
२१	३	तज्जयति	तर्ज्जयति
२१	५	निवशन्तीं	निवसन्तीम्
२३	१८	तनुसङ्गत	तनुसङ्गम
२४	२	उपचिनु	उपचिनुत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पत्रम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२४	२२	निह्नते	निह्नुते
२५	६	गोड़ीरागेण	गौड़ीरागेण
२६	१३	पुनरनुपैतं	पुनरनुपैतुं
३०	२	मिकर	भीकर
३०	३	शोकर	शीकर
३०	८	मरघुनिम्	मरधुनिम्
३०	१६	चपलिमसम्मत	चपलिमसम्मत
३१	१०	नमोज़न	निमीलन
३७	१५	समुत्सुकां	समुत्सुका
४१	१६	पल्लवकुलं	वल्लवकुलं
४३	११	रिपुकुलं	रिपुकुलं
४४	१७	विप्रलब्धार्णने	विप्रलब्धावर्णने
४६	३	धारय	धारय
४७	१३	उद्दामद्यु यतयः	उद्दामद्युतयः
४६	१३	कुञ्चवने	कुञ्जवने
५६	११	किं सुधा	किं मुधा
५६	१६	पल्लवरति	पल्लवरचित
६०	८	यहि	याहि
६१	७	गम्मीरे	गभीरे
६१	१०	नृपपुषोत्तम	नृपपुरुषोत्तम
६७	८	कान्विगीकं	कान्दिशीकं
६८	१४	रम्य	रम्यं
७०	३	गीतते	गीयते
७१	१३	दारुझजा	दारुणझंजा
७१	१८	दानमशोकं	दीनमशोकं
७१	२०	घर्मजतापा	घर्मजतापा
७३	४	मुदुवल्ली	मृदुवल्ली

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पत्रम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७३	५	तनुशोभ	तनुशोभावल्लो
७६	५	नरमुण्ठ	नरमुण्ड
७६	६	समयज,तेवसाने	समयजनितावसाने
७६	१६	मुक्तण्ठै	मुक्तकण्ठै
८०	२	प्रेयसोकुलव	प्रेयसीकुल
८०	४	उन्द्रगोप	इन्द्रगोप
८०	१७	रचितशकुल	रचितशकुन
८६	१३	कर्णाट रागेण	पूरवोरागेण
८८	३	समुपगम्	समुपगतम्
८६	१८	तरुणिमहित	तरुणिमाहित
१०	१६	सिप्रतितमः	सप्र,तितमः
६२	१६	धृतगोत्र	धृतगोत्रं
६२	२०	दलितादिति	दलितदिति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

BIBLIOGRAPHY

SANSKRIT BOOKS—

1. Bhaktamala—by Chandra Datta, 1926
2. Gitagovinda—by Jaya Deva—(NSP-Edn), 1937
3. Sarasvati Vilasa—by Gajapati Prataparudra Deva—(O.L.P-Edn), 1927
4. Dasagrivavadhamahakavya—by Markandeya Mishra, (O S A-Edn), 1959
5. Chhandomanjari—by Ganga Dash, 19
6. Sahityadarpana—by Kaviraja Visvanatha, (C S.S.-Edn) 1967
7. Kumarasambhava—by Kalidasa, (New Delhi Navayuga Prakasan), 1966
8. Padyavali—Edited—by S. K. Dey, 1934,
9. Sangitanarayana—by Gajapati Jagannathanarayan Deva (OSA-Edn), 1966
10. Sangitamuktavali—by Harichandan (Utkal University Edn) 1955
11. Aprakashitaraga—by J. D. Patki, 1965
12. Sangitaparijata—by Ahivala Pandit, 3rd Edition, 1971
13. Sabdakalpadruma—by Raja Radhakanta Deva, 1961
14. Rasakalpadruma—Edited by B Acharya, (O S.A.-Edn), 1965

ORIYA BOOKS—

15. SriJaya Deva O Srigitagovinda—by Sri K. N. Mahapatra, 1973
16. Chayani Chakada—Edited by Sudhakara Pattanaik, 1959
17. Madalapanji—Edited by A. B. Mohanty, (Prachi Edn.)
18. Utkala Sangita Paddhati—by Shyama Sundar Dhir, 1964
19. Dardhyatabhakti—by Rama Das, 1935

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

MANUSCRIPTS—

20. Gopalarchanavidhi—OSM. Mss. Dh. No 70
21. Bharatamrtamahakavya—OSM. Mss. L. No. 14
22. Manimalanatika—OSM. Mss L. No. 58

OTHER BOOKS AND JOURNALS—

23. Indian Ephemeries—Vol. I Part-I, by S. K. Pilai 1922
24. Suryavamsi Gajapatis of Orissa—
by Dr. R. Subrahmaniyama,
25. A. Descriptive Catalogue of Sanskrit Manuscripts.
Vol. I, II Edited by Sri K. N. Mahapatra
(OSM & OSA Edn.) 1960
26. Journal of Asiatic Society, Bengal, Vol. LX II, 1893
27. Orissa Historical Research Journal, Vol. II, 1953
28. -do- Vol. IX, 1960
29. Journal of Kalinga Historical
Research Society, Vol. II, 1947
30. Govt. Oriental manuscript library Catalogue,
(No. 3826), 1918
31. Andhra Patrika—Annual,1928.

NSP—Nirnaya Sagara Press
OSA—Orissa Sahitya Akademi
OSM—Orissa State Museum
OLP—Oriental Library Publication

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi